श्रीः ।

श्रीधर्मदाससूरिप्रणीतं

विदग्धमुखमण्डनकाव्यम् ।

स्वोपज्ञव्याख्यासमलंकृतम् ।

मूल्यं ४ आणकाः ।

श्रीः ।

श्रीधर्मदाससूरिप्रणीतं

विदग्धमुखमण्डनकाव्यम् ।

स्वोपज्ञव्याख्यासमलंकृतम् ।

इद

पणशीकरोपाह्वविद्वद्वरलक्ष्मणशर्मतनुजनुषा

वासुदेवशर्मणा संशोधितम् ।

(द्वितीय संस्करणम् ।)

तच्च

मुम्बय्यां

तुकाराम जावजी

इत्येतैः स्वीये निर्णयसागराख्यमुद्रणयन्त्रालयेऽङ्कयित्वा

प्राकाश्य नीतम् ।

शाके १८३६—सन १९१४.

मूल्यं ४ आणकाः ।

प्रास्ताविकम्।

आपातरमणीयेऽस्मिन्संसारे निजनिजप्राक्तनानुगुणजनिमतां जातिजराभयक्लेशपरंपरापारवश्येन दुःखोदर्केण क्वचनविदग्धमुखानामपि मानुषप्राणिनां मुखसंपदमानन्दोद्रेकेण मण्डयतीति विदग्धमुखमण्डनं नाम स्वनामसदृक्षार्थेनान्वर्थकं काव्यमिदम्। अस्य प्रणेता विद्वदग्रेसरः श्रुतपारदृश्वा श्रीमद्धर्मदाससूरिरासीत्। अयं कविवरः कदा कतमं महीमण्डलखण्डं निजजनुर्निवासाभ्यां मण्डयामास कतिच काव्यानि प्रणिनायेति निर्णेतुं न पारयामः। अनेन तनुतरेऽप्यस्मिन्काव्ये हृद्यैः पद्यैरतीव मनोहारिणी कविचातुरी प्रकटितेति सोल्लुण्ठं कथयामः। अनेन ग्रन्थोपोद्धाते चेत्थमभाणि—

'किं मेऽथवा हतखलप्रणताविह स्या-
त्स स्वीकरोति सुजनो यदि मां गुणज्ञः।
चन्द्रेण चारुचरितेन विकासितं य-
त्संकोचितं भवति किं कुमुदं तमोभिः॥
प्रीत्यै सतां तदनुभावगतावसादः
सत्यज्य गूढरचनां प्रतिभानुरूपम्।
क्षिप्रावबोधकरणक्षममीक्षितार्थं
वक्ष्ये **विदग्धमुखमण्डन**मप्रपञ्चम्॥' इति।

अलं प्रशस्तप्रशंसातिशयेन। अस्मिन्काव्ये प्रणेत्रा चतुरः परिच्छेदान्विधाय तत्र क्रमेण व्यस्तजाति, भेद्यभेदकजाति, चित्रजाति, प्रहेलिकाजाति, कर्तृगुप्तम्, कर्मगुप्तम्, करणगुप्तम्, संप्रदानगुप्तम्, अपादानगुप्तम्, मात्राच्युतकम्, इत्यादि विविधकाव्यप्रकारा यथायथं संदर्भिताः सन्तीत्येतत्काव्यं व्युत्पित्सूनां नैकशो भिन्नकाव्यरचनाप्रकारजातबोधनेनातीवोपकारकं स्यादिति निर्विवादम्। नहि कस्यचित्केवलस्तुतिस्तोत्रवाग्जालेन ग्रन्थप्रागल्भ्यं चेतश्चमत्कृत्युत्पादकं भवति। तच्च ग्रन्थालोचनसमकालमेव स्यादित्येतत्सकृत्संग्राह्यालोचनीयमिति काव्यरसिकान्गुणज्ञान्विज्ञापयति—

पणशीकरोपाह्वविद्वद्वरलक्ष्मणशर्मसूनुः

वासुदेवशर्मा

अनुक्रमणिका ।

समाप्तेयं विषयानुक्रमणी ।

श्रीः ।

श्रीधर्मदाससूरिविरचितं

विदग्धमुखमण्डनकाव्यम् ।

सटीकम् ।

प्रथमः परिच्छेदः ।

सिद्धौषधानि भवदुःखमहागदानां
पुण्यात्मनां परमकर्णरसायनानि ।
प्रक्षालनैकसलिलानि मनोमलानां
शौद्धोदनेः प्रवचनानि चिरं जयन्ति ॥ १ ॥

जयन्ति सन्तः सुकृतैकभाजनं परार्थसंपादनसद्व्रतस्थिताः ।
करस्थनीरोपमविश्वदर्शना जयन्ति वैदग्ध्यभुवः कवेर्गिरः ॥ २ ॥

आक्रान्तेव महोपलेन मुनिना शप्तेव दुर्वाससा
सातत्यं बत मुद्रितेव जतुना नीतेव मूर्छां विषैः ।
बद्धेवातनुरज्जुभिः परगुणान्वक्तुं न शक्तासती
जिह्वा लोहशलाकया खलमुखे विद्धेव संलक्ष्यते ॥ ३ ॥

इहानेके सत्यं सततमुपकारिण्युपकृतिं
कृतज्ञाः कुर्वन्तो जगति निवसन्त्येव सुधियः ।
कियन्तस्ते सन्तः सुकृतपरिपाकप्रणयिनो
विना स्वार्थं येषां भवति परकृत्यव्यसनिता ॥ ४ ॥

एषोऽञ्जलिः सममसज्जनसज्जनौ तौ
वन्दे नितान्तकुटिलप्रगुणस्वभावौ ।
एकं भियाभिनवसंहितवैरिभावं
प्रीत्या परं परमनिर्वृतिपात्रभूतम् ॥ ५ ॥

किं मेऽथवा हतखलप्रणताविह स्या-
त्स स्वीकरोति सुजनो यदि मां गुणज्ञः ।
चन्द्रेण चारुचरितेन विकाशितं य-
त्संकोचितं भवति किं कुमुदं तमोभिः ॥ ६ ॥

प्रीत्यै सतां तदनुभावगतावसादः
संत्यज्य गूढरचनां प्रतिभानुरूपम् ।

क्षिप्रावबोधकरणक्षममीक्षितार्थं
वक्ष्ये विदग्धमुखमण्डनमप्रपञ्चम् ॥ ७ ॥
यद्यस्ति सभामध्ये स्थातुं वक्तुं मनस्तदा सुधियः ।
ताम्बूलमिव गृहीत्वा विदग्धमुखमण्डनं विशत ॥ ८ ॥

उद्देशकम् ।

प्राहुर्व्यस्तं समस्तं च द्विर्व्यस्तं द्विःसमस्तकम् ।
तथा व्यस्तसमस्तं च द्विर्व्यस्तकसमस्तकम् ॥ ९ ॥
सद्विःसमस्तकव्यस्तमेकालापं प्रभिन्नकम् ।
भेद्यभेदकमोजस्वि सालंकारं सकौतुकम् ॥ १० ॥
प्रश्नोत्तरसमं पृष्टप्रश्नं भग्नोत्तरं तथा ।
आदिमध्योत्तराख्ये द्वे अन्त्योत्तरमतःपरम् ॥ ११ ॥
कथितापह्नुतिं चैव विषमं वृत्तनामकम् ।
नामाख्यातं च तार्क्ष्यं च सौत्रं शाब्दीयशास्त्रजे ॥ १२ ॥
वर्णवाक्योत्तरे तद्वच्छ्लोकोत्तरमतः परम् ।
खण्डपादोत्तरे चक्रं पद्मं काकपदं तथा ॥ १३ ॥
गोमूत्रीं सर्वतोभद्रं गतप्रत्यागतं बहु ।
वर्धमानाक्षरं तद्वद्धीयमानाक्षरं तथा ॥ १४ ॥
शृङ्खलां नागपाशं च चित्रं संशुद्धमेव च ।
प्रहेलिकां तथा हृद्यं कालसारादि वर्णितम् ॥ १५ ॥
अजमारादिकं गूढं पदपादार्थगूढकम् ।
स्तुतिनिन्दां तथा द्व्यर्थं सहापह्नुतिबिन्दुमत् ॥ १६ ॥
क्रियाकारकसंबन्धगुप्तान्यामन्त्रितस्य च ।
गुप्तं तथा समासस्य लिङ्गस्य वचनस्य च ॥ १७ ॥
मात्राबिन्दुविसर्गाणां च्युतकान्यक्षरस्य च ।
स्थानव्यञ्जनयोश्चापि च्युतदत्ताक्षरं तथा ॥ १८ ॥

इत्युद्देशकम् ।

पृष्टं पदविभागेन केवलेनैव यद्भवेत् ।
विदुर्व्यस्तं समस्तं यत्समुदायेन पृच्छति ॥ १९ ॥

पृष्टमिति ॥ पृथक् पृच्छयते तत् व्यस्त पृष्टम् ॥

पूजायां किं पदं प्रोक्तमस्तनं को बिभर्त्युरः ।
क आयुधतया ख्यातः प्रलम्बासुरविद्विषः ॥ २० ॥

सुनासीरः ॥ सु. पूजायाम् । ना पुरुष । सीरो हलम् ।

किं दुराढ्यस्य मोहाय का प्रिया सुरविद्विषः ।
पदं प्रश्नवितर्के किं को दन्तच्छदभूषणम् ॥ २१ ॥

रामानुरागः ॥ रा. धनम् । मा लक्ष्मी । नु इति वितर्के । रागः आरक्तत्वम् ॥

इति व्यस्तजातिः ।

अपि सेविता द्विजिह्वैः कदापि के यान्ति न विकारम् ।
विच्छिद्यमानतनव. स्वगुणैरधिकं विराजन्ते ॥ २२ ॥

मलयतरवः ॥ समुदायेन पृच्छयते तत्समस्त पृष्टम् । मलयतरवश्चन्दनवृक्षाः॥

अनिभृतकोकिलनिःस्वनमुखरितसहकारकानन. पुंसाम् ।
को हरतितरा हृदयं मधुकरझकारिकङ्केलिः ॥ २३ ॥

मधुसमयः ॥ मधोर्वसन्तस्य समय काल ॥

इति समस्तजातिः ।

व्यस्तं समस्तमथवा समासपदभङ्गतः ।
द्विःपृष्टं यत्तदेव स्याद्विर्व्यस्तं द्विःसमस्तकम् ॥ २४ ॥

द्विवार पृथक पृच्छयते तद्विर्व्यस्तं पृष्टम् ॥

वर्षासु का भवति निर्मधु कीदृगब्जं
शेषं बिभर्ति वसुधासहितं क एकः ।
आमन्त्रयस्व धरणीधरराजपुत्रीं
को वास्ति भस्मनिचिताङ्गजनाश्रयः स्यात् ॥ २५ ॥

कालिकापालिकमठः ॥ कालिका श्यामता । अपगता अलयो भ्रमरा यस्मात्तदपालि भ्रमररहितम् । के पानीये मठ स्थान यस्य स कमठ कच्छप । हे कालि हे पार्वति । कपालैर्नरमुण्डैर्विराजते कापालिको योगी तस्य मठ प्रसिद्धः ॥

कीदृशं वद मरुस्थलं मतं द्वारि कुत्र सति भूषणं भवेत् ।
ब्रूहि कान्त सुभटः सकार्मुक. कीदृशो भवति कुत्र विद्विषाम् २६

अवारितोरणे ॥ न विद्यते वारि जलं यस्मिन् तत् अवारि । तोरणे सति । 'बहिर्द्वार तु तोरणम्' । रणे सग्रामे अवारित न वारयितु शक्यत इत्यवारित ॥

इति द्विर्व्यस्तजातिः ।

पक्षिश्रेष्ठसखीवभ्रूसुरा वाच्याः कथं वद ।
ज्येष्ठे मासि गताः शोषं कीदृश्योऽल्पजला भुवः ॥ २७ ॥

विवरालीनकुलीराः ॥ द्विवारं समुदायेन पृच्छयते तत् द्वि समस्तकं पृष्टम् ।

विः पक्षी । वरं श्रेष्ठम् । आली सखी । नकुली नकुलस्त्री । इरा मदिरा । विवरेषु छिद्रेषु आलीनाः प्रविष्टाः कुलीराः जलचरजीवविशेषाः यासु ताः ॥

विश्वंभराप्रलम्बघ्नव्रीहिमानुषसंयुताः ।
कथं वाच्या भवन्त्येता दिनान्ते विकसन्ति काः ॥ २८ ॥

कुवलयवनराजयः ॥ कु: पृथ्वी । वलो बलभद्रः । बवयोरैक्यम् । यवो धान्यभेदः । नरो मनुष्यः । आजिः सग्रामः । कुवलयाना कमलानां वनाना राजयः पङ्क्तयः ॥

इति द्विःसमस्तजातिः ।

पृष्टं पदविभागेन समुदायेन यद्भवेत् ।
विदुर्व्यस्तसमस्तं तदुभयार्थप्रदर्शकम् ॥ २९ ॥

व्यस्त च तत्समस्तं च व्यस्तसमस्तं पृष्टम् ॥

का प्रियेण रहिता वराङ्गना धाम्नि केन तनयेन नन्दिता ।
कीदृशेन पुरुषेण पक्षिणां बन्धनं समभिलष्यते सदा ॥ ३० ॥

शकुन्तलाभरतेन ॥ शकुन्तलानाम्नी ऋषेः पुत्री । भरतनाम्ना पुत्रेण नन्दिता इत्यर्थः । शकुन्ताना पक्षिणा लाभो द्रव्योपार्जनं तत्र रत आसक्तस्तेन शकुन्तलाभरतेन व्याधेनेत्यर्थः ॥

कीदृशं हृदयहारि कूजितं कः सखा यशसि भूपतेर्मतः ।
कस्तवास्ति विपिने भयाकुल: कीदृशश्च न भवेन्निशाकरः ॥ ३१ ॥

कलंकविरहितः ॥ कल मधुर शब्दः । कविः राज्ञा काव्यादिग्रन्थरचनाकृत् । अहितः शत्रु । कलङ्केन मृगरूपाभिज्ञानेन विरहित । न स्यादिति भावार्थः ॥

इति व्यस्तसमस्तजातिः ।

द्विर्व्यस्तमेव यत्पृष्टं समुदायेन यद्भवेत् ।
त्रिधा भिन्नं तदेवोक्तं द्विर्व्यस्तकसमस्तकम् ॥ ३२ ॥

द्विवार व्यस्तीकृत्य पश्चात्समुदायेन पृच्छयते तद्विर्व्यस्तकसमस्तक पृष्टम् ॥

कौ शंकरस्य वलयावपयोधरः कः
कीदृक्परस्य नियतं वशमेति भूपः ।
संबोधयोरगपतिं विजयी च कीदृ-
ग्दुर्योधनो नहि भवेद्वद कीदृशश्च ॥ ३३ ॥

अहीनाक्षतनयः ॥ अहि सर्पः । ना पुमान् । क्षतनयः क्षत: खण्डितो नयो न्यायो येन स: अन्यायवान् । हे अहीन अहीना सर्पाणामिन स्वामी तत्संबोधनम् । अक्षतनयः न क्षतो नयो न्यायो येन स अखण्डन्यायवान् ॥ हीने अक्षिणी यस्यासौ हीनाक्षोऽन्धस्तस्य तनयः पुत्रः न हीनाक्षतनयोऽहीनाक्षतनयः । धृतराष्ट्रो हि हीनाक्षोऽन्ध इति पौराणिकाः । तत्पुत्रो दुर्योधनोऽहीनाक्षतनयो न भवति कि तु अन्धपुत्र इत्यर्थः ॥

को मोहाय दुरीश्वरस्य विदितः संबोधनीयो गुरुः
को धान्यां विरलः कलो नवघनः किंवञ्च कीदृग्द्विजः ।
किं लेखावचनं भवेदतिशयं दुःखाय कीदृक्खलः
को विघ्नाधिपतिर्मनोभवसमोमूर्तः पुमान्कीदृशः ॥ ३४ ॥

राजीवसन्निभवदनः ॥ रा· द्रव्यम् । हे जीव हे गुरो । सन् सज्जन । इभ-वत् हस्तिवत् । न विद्यते अ कृष्णोऽस्मिन्निति अन । ब्राह्मणो हि कृष्णरहितः कदाचिन्न स्यादित्यर्थ । राजी पङ्क्तिः । वसन् निवास कुर्वन् । इभवदन. इभवन् हस्तितुल्यं वदनं मुख यस्यासौ गणेश इत्यर्थ. । राजीवेन कमलेन सन्निभं सदृशं वदनं मुख यस्यासौ राजीवसन्निभवदन. ॥

इति द्विर्व्यस्तकसमस्तजातिः ।

द्विःसमस्तं यदा पृष्टं व्यस्तकेन पुनर्भवेत् ।
तद्विःसमस्तकव्यस्तं कथितं प्रश्नपण्डितैः ॥ ३५ ॥

द्विवार समुदायेन पृष्ट्वा पुनर्व्यस्तकेन पृच्छयते तत् द्वि समस्तकव्यस्तं पृष्टम् ॥

कीदृक्षः सकलजनो भवेत्सुराज्ञः
कः कालो विदित इहाधिकारहेतुः ।
कः प्रेयान्कुमुदवनस्य को निहन्ति
भ्रातृव्यं वद शिरसा जितस्त्वया कः ॥ ३६ ॥

विधुरविरहितः ॥ विधुरेण कष्टेन विरहित । सुखीत्यर्थ ॥ विधुश्च रविश्च विधु-रवी चन्द्रादित्यौ ताभ्या रहित ॥ विधुश्चन्द्र । अवि. ऊर्णायु । अहित शत्रु ॥

संग्रामे स्फुरदसिना त्वया[1] जिताः के
के दुःखं बत निरये नरस्य कुर्युः ।
कस्मिन्नुद्भवति कदापि नैव लोम
ज्ञाताः के जगति महालघुत्वभाजः ॥ ३७ ॥

नरकरेणवः ॥ नराश्च करेणवश्च मनुष्यहस्तिन ॥ नरकस्य रेणवो धूल्य· अग्नि-रूपा वालुका इत्यर्थ. । नरकरे पुरुषाणा हस्ततले ॥ अणवः परमाणवः ॥

इति द्विःसमस्तकव्यस्तजातिः ।

एकश्रुत्या वचो यत्र भिन्नार्थप्रतिपादकम् ।
प्रभेदं द्विःसमस्तस्यात्तमेकालापकं विदुः ॥ ३८ ॥

द्वि समस्तस्य प्रभेदं एकालापकं पृष्टम् ॥

कीदृशी निरयभूरनेकधा सेव्यते परमपापकर्मभिः ।
प्रेतराक्षसपिशाचसेविता कीदृशी च पितृकाननस्थली ॥ ३९ ॥

नरकपालरचिता ॥ नराकाणां पालाः नारकजीवरक्षकाः यमास्ते रचिता

---

१ 'हतास्त्वया के' इति पाठः.

उपस्कृता । नराणां कपालानि कर्पराणि तैः कृत्वा रचिता । श्मशानभूमिस्तु मनुष्याणां मुण्डैः सहिता भवति ॥

केसरद्रुमतलेषु संस्थितः कीदृशो भवति मत्तकुञ्जरः ।
तत्त्वतः शिवमपेक्ष्य लक्ष्मणैरर्जुनः समिति कीदृशो भवेत् ॥ ४० ॥

दानवकुलभ्रमरहितः ॥ दानेन मदेन वकुलानां वृक्षाणां भ्रमरेभ्यः सकाशात् हितः हितकृदित्यर्थः ॥ दानवानां दैत्यानां कुले यो भ्रमो दानवा अमी युध्यन्तीति मिथ्या ज्ञानं तेन रहितः ॥

इत्येकालापकजातिः ।

शब्दार्थलिङ्गवचनैर्व्यस्तैर्यद्वा समस्तकैः ।
विभक्त्या च प्रभिन्नं यत्तत्प्रभिन्नकमुच्यते ॥ ४१ ॥

शब्दार्थौ लिङ्गेन वचनेन विभक्त्या च भेदं प्राप्तौ यस्मिन् तत्प्रभिन्नकं पृष्टम् ॥

निर्जितसकलारातेः पृच्छतिः कोनको मृत्योर्भयमृच्छति ।
मेघात्ययकृतसुचिराशायाः किं तिमिरक्षयकारि निशायाः ॥ ४२ ॥

विधुतारातेजः ॥ हे विधुताराते विधुताः कम्पिताः अरातयः शत्रवो येन स तत्संबोधनम् ॥ अजः ब्रह्मा कृष्णः शंभुरपि च ॥ विधुश्चन्द्रः ताराः नक्षत्राणि तासां तेजः प्रकाशः ॥

विहगपतिः कं हतवानहितं कीदृग्भवति पुरं जनमहितम् ।
किं कठिनं विदितं वद धीमन् यादःपतिरपि कीदृग्भयकृत् ॥४३॥

अहिमकरमयः ॥ अहिं सर्पं ॥ अकरं नास्ति करो राजदण्डो यस्मिन् तत् ॥ अयो लोहम् ॥ अहिमकरमयः अहयः सर्पाः मकराः मत्स्यविशेषास्तन्मयः ॥

इति शब्दार्थलिङ्गप्रभिन्नकम् ।

अनुकूलविधायिदैवतो विजयी स्यान्नु कीदृशो नृपः ।
विरहिण्यपि जानकी वने निवसन्ती मुदमादधौ कुतः ॥ ४४ ॥

कुशलवर्द्धितः ॥ कुशलैः शुभसूचकशकुनैः वर्द्धितो वर्द्धापितः ॥ कुशश्च लवश्च कुशलवनामानौ पुत्रौ तयोर्वृद्धिः संपत्तस्मात् ॥

कुसुमं पतदेत्य नाकतो वद कस्मै स्पृहयन्ति भोगिनः ।
अधिगम्य रतं वराङ्गना क नु यत्नं कुरुते सुशिक्षिता ॥ ४५ ॥

सुरतरवे ॥ कल्पवृक्षाय वाञ्छति ॥ सुरतस्य संभोगस्य रवः शब्दस्तस्मिन् ॥

इति शब्दार्थविभक्तिभिन्नम् ।

कामुज्जहार हरिरम्बुधिमध्यमग्नां
कीदृक्श्रुतं भवति निर्मलमानसानाम् ।
आमन्त्रयस्व वनमग्निशिखावलीढं
तत्रापि को दहति के मदयन्ति भृङ्गान् ॥ ४६ ॥

कुंदमकरंदबिंदवः ॥ कुं पृथ्वीं । दमकरं शमदमउपशमक्षमायुक्तं भवतीत्यर्थः ।

हे दविन् दवो विद्यते यस्मिन् तत् दवि तत्संबोधनम् दवो वनाग्निस्तेन युक्तमित्यर्थः। दावो वनाग्नि. ॥ कुन्दमकरन्दबिन्दवः कुन्दानां पुष्पविशेषाणा मकरन्दः पुष्परसो· गन्धस्तस्य बिन्दवः कणाः ॥

वसति कुत्र सरोरुहसंततिर्दिनकृतो ननु के तिमिरच्छिदः ।
पवनभक्षसपत्नरणोत्सुकं पुरुषमाह्वय को जगति प्रियः ॥४७॥

केकिरणोत्कराः ॥ के पानीये । किरणाना उत्करा समूहाः । हे केकिरणोत्क, 'केका वाणी मयूरस्य' इत्यमरः । केका विद्यते येषा ते केकिन केकिना मयूराणा रणे शब्दे उत्क उत्सुक. तत्संबोधनम् । रा द्रव्यम् ॥

इति शब्दार्थवचनभिन्नम् ।

कीदृग्गृहं याम्यगृहं गतस्य कास्त्राणमम्भस्तरणे जनानाम् ।
भूषा कथं कण्ठगते नु पृष्टे मुक्ताकलापैरिति चोत्तरं किम् ॥४८॥

हाराविनावः ॥ हारावि हा इति खेदे । हा इति राव. शब्दो विद्यते यस्मिन् तत । नाव नौका. । हे हारा· व. युष्मान् विना ॥

कवयो वद कुत्र कीदृशाः कठिनं किं विदितः समन्ततः ।
अधुना तव वैरियोषितां हृदि तापः प्रबलो विहाय काः॥४९॥

गिरिसारमुखाः ॥ गिरि वाण्याम् । सारं प्रधानम् । स्फुटोच्चारवन्मुख वदन येषा ते । गिरिसार लोह । उखा स्थाली अन्नरन्धनहण्डिका ॥

इति शब्दार्थलिङ्गविभक्तिवचनभिन्नम् ।

मेघात्यये भवति किं सुभगावगाहं
का वा विडम्बयति वारणमल्लवेश्याः ।
दुर्वारवीर्यविभवस्य भवेद्रणे कः
काः स्मेरवक्त्रसुभगास्तरणिप्रभाभिः ॥ ५० ॥

सरोजराजयः ॥ सरस्तडागम् । जरा वयोहानि । जयः प्रसिद्ध· ॥ सरोजराजय सरोजाना कमलाना राजय श्रेण्य ॥

पृच्छति शिरसिरुहो मधुमथनं
मधुमथनस्तं शिरसिरुहं च ।
कः खलु चपलतया भुवि विदितः
का ननु यानतया गवि गदिताः ॥ ५१ ॥

केशवनौकाः ॥ हे केशव हे हरे । हे केश हे वाल । वनौकाः वने ओको गृह यस्यासौ वनौका वानर । नौकाः नाव ॥

इति शब्दार्थलिङ्गवचनभिन्नम् ।

न भवति मलयस्य कीदृशी भूः क इह कुचं न बिभर्ति कं गता श्रीः ।
भवदरिनिवहेषु कास्ति नित्यं बलमथनेन विपद्व्यधायि केषाम् ॥५२॥

विपन्नगानाम् ॥ विपन्नगा विगताः पन्नगाः सर्पा यस्या· सा ईदृशी न किंतु

पन्नगसहितैव । ना पुमान् । अम् कृष्णम् । विपत् संपदोऽभावः अलक्ष्मी· दरिद्रता । नगानां पर्वतानाम् ।

समयमिह वदन्ति कं निशीथं शमयति कान्वद वारिवाहवृन्दम् ।
वितरति जगतां मनःसु कीदृक्मुदमतिमात्रमयं महातडागः ॥ ५३ ॥

अरविंदवान् ॥ अरविं नास्ति रवि सूर्यो यस्मिन् स अरविस्तम् । दवान् दावानलान् । अरविन्दवान् । अरविन्दानि कमलानि विद्यन्ते यस्मिन् सोऽरविन्दवान् । मत्वन्त. ॥

इति शब्दार्थविभक्तिवचनभिन्नम् ।

कीदृक्षं समिति बलं निहन्ति शत्रुं
विष्णोः का मनसि मुदं सदा तनोति ।
तुच्छं सच्छरधिमुखं निगद्यते किं
पश्वत्वैः सममपमान एव केषु ॥ ५४ ॥

अभिमानिषु ॥ अभि नास्ति भीर्भयं यस्य तत् । मा लक्ष्मी । अनिषु न विद्यन्ते इषवो बाणा यस्मिन तत् । अभिमानिषु गर्ववत्सु ॥

घनसमये शिखिषु स्यान्नृत्यं कीदृक्षु किं घनात्पतति ।
प्रावृषि कस्य न गमनं मानसगमनाय कीदृशा हंसाः ॥५५॥

समुत्सुकमनसः ॥ समुत्सु मुदा हर्षेण सहवर्तमाना समुदस्तेषु । क पानीय। अनस शकटस्य । समुत्सुकमनस स सम्यक् उत् प्राबल्येन सु अतिशयेन यत् उत्पन्नं तत्समुत्सुक 'इष्टार्थोद्युक्त उत्सुक' इत्यमर । समुत्सुक उत्कण्ठायुक्त मनो येषा ते ॥

इति शब्दार्थलिङ्गवचनभिन्नम् ।

इति प्रभिन्नकजातिः ।

अर्थमात्रैकभेदेन भिन्नं बध्नन्ति केचन ।
सुकुमारधियस्तच्च विदग्धैर्नादृतं यथा ॥ ५६ ॥

आनन्दयति कोऽत्यर्थं सज्जनानेव भूतले ।
प्रबोधयति पद्मानि तमांसि च निहन्ति कः ॥ ५७ ॥

मित्रोदयः ॥मित्राणा सखीनां उदयो वृद्धि । मित्रस्य सूर्यस्य उदय उद्गमनम् ॥

अटवी कीदृशी प्रायो दुर्गमा भवति प्रिये ।
प्रियस्य कीदृशी कान्ता तनोति सुरतोत्सवम् ॥ ५८ ॥

मदनवती ॥ मदना मदनवृक्षा विद्यन्ते यस्या सा । अतिगहनत्वाद्दुर्गमा । मदन. कामो विद्यते यस्या. सा सयौवना इत्यर्थ ॥

इति प्रकारान्तरेण प्रभिन्नकजातिः ।

भिन्नाववश्यं कर्तव्यौ शब्दार्थौ प्रश्नपण्डितैः ।
लिङ्गाङ्गिषु यथाशक्ति भेदमाहुर्मनीषिणः ॥ ५९ ॥

इति प्रथम. परिच्छेद. ।

द्वितीयः परिच्छेदः ।

विशेषणं विशेष्येण यत्र प्रश्ने विधीयते ।
भेद्यभेदकमाहुस्तं प्रश्नं प्रश्नविदो यथा ॥ १ ॥

यस्मिन्पृष्टे विशेष्येण युक्त विशेषणं क्रियते तत् भेद्यभेदकं भेद्यं च भेदकं च भेद्यभेदके भेद्यभेदके यस्मिन् तत् भेद्यभेदकं पृष्टम् ॥

कीदृक्किं स्यान्न मत्स्यानां हितं स्वेच्छाविहारिणाम् ।
गुणैः परेषामत्यर्थं मोदते कीदृशः पुमान् ॥ २ ॥

विमत्सरः ॥ वय पक्षिणो विद्यन्ते यस्मिन् तत् विमत् ईदृशं सरस्तडागः । विगतो मत्सर. अहकारो यस्य स ॥

अगस्त्येन पयोराशेः कियत्कि पीतमुज्झितम् ।
त्वया वैरिकुलं वीर समरे कीदृशं कृतम् ॥ ३ ॥

सकलंकं ॥ सकलं समस्तं कं पानीयं पीतं । मूत्रं च सकलङ्कं कलङ्केनाननलाञ्छनेन सहवर्तमानं कृतम् ॥

इति भेद्यभेदकजातिः ।

दीर्घवृत्तेन यत्पृष्टमुत्तरं कियदक्षरम् ।
तदोजस्वीति विख्यातमूर्जितं चेति केचन ॥ ४ ॥

यत्पृष्ट दीर्घश्लोकेन पृच्छयते तस्योत्तरं स्तोकैरक्षरैर्भवेत् तत ओजस्वि पृष्टम् ॥

कामिन्याः स्तनभारमन्थरगतेर्लीलाचलच्चक्षुषः
कंदर्पैकविलासनित्यवसतेः कीदृक्पुमान्वल्लभः ।
हेलाकृष्टकृपाणपाटितगजानीकात्कुतस्तेऽरय.
श्वासायासविशुष्ककण्ठकुहरा निर्यान्ति जीवार्थिनः ॥ ५ ॥

समरतः ॥ सम तुल्य रतं भोगक्रिया यस्य स । समरत. सग्रामात् ॥

दैत्यारातिरसौ वराहवपुषा कामुज्जहाराम्बुधेः
का रूपं विनिहन्ति को मधुवधूवैधव्यदीक्षागुरुः ।
स्वच्छन्दं नवशल्लकीकवलनैः पम्पासरोमज्जनैः
के विन्ध्याद्रिवने वसन्त्यभिमतक्रीडाभिरामस्थिताः ॥ ६ ॥

कुंजराः ॥ कुं पृथ्वीम् । जरा वृद्धत्वम् । अ. कृष्ण. । कुञ्जरा. हस्तिनः ॥

इत्योजस्विजातिः ।

उपमादिरलंकारो बहुधा परिकीर्तितः ।
यत्नेन कथ्यते सार्धं सालंकारं तदुच्यते ॥ ७ ॥

अलकारैः सहवर्तमानं सालंकार पृष्टम् ॥

कल्याणवाक्त्वमिव किं पदमत्र कान्तं
सद्भूपतेः स्वमिव कः परितोषकारी ।

क: सर्वदा वृषगतिस्त्वमिवातिमात्रं
भूत्याश्रितः कथय पालितसर्वभूतः ॥ ८ ॥

शंकरः ॥ शं सुखं । करो राजभागः । शंकरो महादेव. ॥

सूर्यस्य का तिमिरकुञ्जरवृन्दसिंही
सत्यस्य का सुकृतवारिधिचन्द्रलेखा ।
पार्थश्च कीदृगरिदावहुताशनोऽभू-
त्का मालतीकुसुमदाम हरस्य मूर्ध्नि ॥ ९ ॥

भागीरथी ॥ भा कान्ति. । गी वाणी । रथी रथो विद्यते यस्य स । भगीरथेन आनीता भागीरथी गङ्गा ॥

रूपकं सालंकारजातिः ।

लघुवृत्तेन यत्पृष्टं प्रभूताक्षरमुत्तरम् ।
सकौतुकमितीच्छन्ति तद्विदस्तादिदं यथा ॥ १० ॥

लघुश्लोकेन यत्पृष्ट पृच्छयते तस्योत्तर बह्वक्षरैर्भवेत् तत्सकौतुक पृष्टम् ॥

के स्थिराः के प्रियाः स्त्रीणां कोऽप्रियो नक्तमाह्वय ।
नृत्यभूः कीदृशी रम्या नदी कीदृग्घनागमे ॥ ११ ॥

अगाधवारिपूरजनिततरंगा ॥ अगा पर्वता । धवा. भर्तार । रिपु शत्रु । हे रजनि । ततरगा ततो विस्तीर्णो रङ्गो नर्तनमण्डपो यस्या सा । अगाधेन अतलस्पर्शेन वारिपूरेण जलसमूहेन जनिता उत्पादितास्तरगा लहर्यो यस्या सा ॥

का कृता विष्णुना कीदृग्योषितां कः प्रशस्यते ।
असेव्यः कीदृशः स्वामी को निहाता निशातमः ॥ १२ ॥

कुमुद्वनवान्धवोदयः ॥ को पृथिव्या मुत् कुमुत् । पृथिव्या मध्ये प्रीति. कृतेत्यर्थ । अवन रक्षणं विद्यते यस्यासौ अवनवान् रक्षाकर धवो भर्ता । सविशेषणमुत्तरं अत्र कृतम् । नास्ति दया यस्य स अदय दयारहितः । अथवा 'दय दाने' । नास्ति दयो दान यस्य स अदय अदाता ॥ कुमुदाना चन्द्रविकासिकमलाना वनाना बान्धवो भ्राता चन्द्रस्तस्योदय. प्रकटभाव. ॥

इति सकौतुकजातिः ।

प्रश्नवर्णविधेस्तुल्यं यत्र स्यादुत्तरं वरम् ।
प्रश्नोत्तरसमं तज्ज्ञास्तदाहुः श्रूयतां यथा ॥ १३ ॥

प्रश्नश्च उत्तर च प्रश्नोत्तरे ताभ्यां सम युगपद्भवनमेकीभूतं प्रश्नोत्तरसमं पृष्टम् ॥

कंदर्पं मदजनकं प्राहुः काचघटी गदिताच्छतमेह ।
इत्यादि प्रश्ने युक्तं यद्ब्रूत तदुत्तरमाशु विचिन्त्य ॥ १४ ॥

कंदर्पं कामं । काचघटी काच प्रसिद्धः अतिनिर्मलस्तस्य घटी कूपिका ॥

पथिकस्तिष्ठति कष्टं विरही नाविक आस्ते तत्कृतरक्षः ।
इत्यादि प्रश्ने युक्तं यद्ब्रूहि तदुत्तरमुत्तमपूरुष ॥ १५ ॥

पथि मार्गे चलति सः पथिकः । नाविक पोतवाह ॥

इति प्रश्नोत्तरसमजातिः ।

यस्मिन्नुत्तरमुच्चार्य प्रश्नस्तस्यैव पृच्छ्यते ।
पृष्टप्रश्नं तदिच्छन्ति प्रश्नोत्तरविदो यथा ॥ १६ ॥

यस्मिन् प्रश्नविषये प्रथममुत्तरस्योच्चार कृत्वा तस्यैवोत्तरस्य पुन प्रश्न पृच्छ्यते तत् पृष्टप्रश्न नाम पृष्टम् ॥

लक्ष्मणेत्युत्तरं यत्र प्रश्नः स्यात्तत्र कीदृशः ।
ग्रीष्मं द्विरदवृन्दाय वनाली कीदृशी हिता ॥ १७ ॥

कासारसहिता ॥ अत्र का सारसहिता इति प्रश्न प्रथमवारमेव । द्वितीयवार उत्तरम् । सारसस्य पक्षिणो हिता प्रिया का इति प्रश्न । 'हंसस्य योषिद्वरटा सारसस्य तु लक्ष्मणा' इत्यमर । कासारेण अखातसरोवरेण सहिता सहवर्तमाना ॥

चादय इति यत्र स्यादुत्तरमथ तत्र कीदृशः प्रश्नः ।
कथय त्वरितं के स्युर्नौकाया वाहनोपायाः ॥ १८ ॥

केनिपाताः ॥ अत्रापि के निपाता इति प्रश्न प्रथमवारमेव । द्वितीयवार उत्तरम् । निपाता के भवन्तीति प्रश्न । चादयो निपातसंज्ञाः । के पानीये निपतन्ति ते केनिपाता । अलुकसमास 'हालेसा' इति भाषा ॥

इति पृष्टप्रश्नजातिः ।

कथयामुकमित्यादि भङ्क्त्वा यत्रोत्तरं भवेत् ।
भग्नोत्तरं तदिच्छन्ति काकुमात्रेण गोपितम् ॥ १९ ॥

अनिर्दिष्ट पृष्ट भङ्क्त्वा यत्रोत्तरं भवेत् तत् भग्नोत्तर भग्न उत्तरं यस्मिन् तत् भग्नोत्तरं पृष्टम् ॥

भवत इवातिस्वच्छं कस्याभ्यन्तरमगाधमतिशिशिरम् ।
काव्यामृतरसमग्नस्त्वमिव सदा कः कथय सरसः ॥ २० ॥

शब्दविकारमात्रेण गोपितं उत्तरमन्तपदे सरसस्तडागस्य रसेन शृङ्गारादिना सहवर्तमानः सरस पुमान् ॥

वीरे सरुषि रिपूणां नियतं का हृदयशायिनी भवति ।
नभसि प्रस्थितजलदे का राजति हन्त वद तारा ॥ २१ ॥

अत्राप्युत्तरमन्तपदे । आरा चर्मप्रभेदिनी । शत्रूणां मनसि दुःखरूपा आरा तारा । 'नक्षत्रमृक्षं भं तारा' इत्यमरः ॥

इति भग्नोत्तरजातिः ।

यत्पृष्टं प्रश्नवाक्ये स्यादादिमध्यान्तसंस्थितम् ।

उत्तरं तत्त्रिधा प्रोक्तमादिमध्यान्तसंज्ञितम् ॥ २२ ॥

प्रश्नाना पदसमुदाये आदौ यदुत्तरं भवेत् तत् आद्युत्तरं पृष्टम् ॥

भ्रमरहितः कीदृक्षो भवतितरां विकसितः पद्मः ।
ज्योतिषि कः कीदृक्षः प्रायो भुवि पूज्यते लोकैः ॥ २३ ॥

भ्रमरहित भ्रमराणां भृङ्गाणां हितो हितकृत् । भ्रमेण मिथ्यामत्या रहित- शुद्धज्ञानवान् ॥

प्रभवः को गङ्गाया नगपतिरतिसुभगशृङ्गधरः ।
के सेव्यन्ते सेवकसार्थैरत्यर्थमर्थरतैः ॥ २४ ॥

प्रभव उत्पत्तिस्थानम् । प्रभवो महान्त ईश्वरा. । आद्युत्तरजातिरिति प्रश्नाना पदसमुदायमध्ये यदुत्तर भवेत् तत् मध्योत्तरं पृष्टम् ॥

इत्याद्युत्तरजातिः ।

अयमुदितो हिमरश्मिर्वनितावदनस्य कीदृशः सदृशः ।
नीलादिकोपलम्भः स्फुरति प्रत्यक्षतः कस्य ॥ २५ ॥

सदृश· समान इव दृश्यतेऽसौ तुल्य इत्यर्थ । दृशा नेत्रेण सहवर्तमान सदृक्तस्य दृश सनेत्रस्य मनुष्यस्य ॥

गैरिकमनःशिलादिः प्रायेणोत्पद्यते कुतो नगतः ।
यः खलु न चलति पुरुषः स्थानादुक्तः स कीदृक्षः ॥ २६ ॥

नगत नगात्पर्वतात् न गत स न जगामेत्यर्थ ॥ प्रश्नाना पदसमुदायी अन्ते यदुत्तर भवेत्तत् अन्तोत्तरं पृष्टम् ॥

इति मध्योत्तरजातिः ।

कस्मिन्वसन्ति वद मीनगणाविकल्पं
किंवापदं वदति किं कुरुते विवस्वान् ।
विद्युल्लतावलयवान्पथिकाङ्गनाना-
मुद्वेजको भवति कः खलु वारिवाहः ॥ २७ ॥

वारिवाह । वारि जले । वा विकल्पार्थे । अह दिनम् । वारिवाहो मेघ ॥

शब्दः प्रभूगत इति प्रचुराभिधायी
कीदृग्भवेद्वदत शब्दविदो विचिन्त्य ।
कीदृग्बृहस्पतिमते विदिताभियोगः
प्रायः पुमान्भवति नास्तिकवर्गमध्यः ॥ २८ ॥

नास्तिकवर्गमध्यः न अस्ति न विद्यते कवर्गो गकारो मध्ये यस्य सः कवर्गमध्य- प्रभूगतोऽयं शब्द । कोऽर्थ. । यदा प्रभूगतस्य मध्यात्कवर्गीयो गकारो लुप्यते तदा प्रभूत इत्येवावशिष्यते । प्रभूत- प्रचुरवाची नास्तिकाना अपुनर्जन्मवादिना वर्गः समूहस्तस्य मध्येऽन्तर्वर्ती । नास्ति परलोके मतिर्येषा ते नास्तिका इति व्युत्पत्त्या तेषा मत भिन्नमेवास्ति ॥

इत्यन्तोत्तरजातिः ।

पदान्तरादिसंबन्धात्प्रश्नवाक्येऽपि संस्थितम् ।
कथितापह्नुतिः सा स्याल्लक्ष्यते यत्र नोत्तरम् ॥ २९ ॥

यत्पृष्टं प्रश्नवाक्ये संस्थितमपि पदान्तरेषु गोपनात् उत्तर न ज्ञायते तत्कथितापह्नुति पृष्टम् ॥

पृथ्वीसंबोधनं कीदृक्कविना परिकीर्तितम् ।
केनेदं मोहितं विश्वं प्रायः केनाप्यते यशः ॥ ३० ॥

कथितस्य भाषितस्यापि अपह्नुतिः निह्नवनं यस्मिन् तत् । कविना इति उत्तरम् । को हे पृथ्वि । इना कामेन । कविना काव्यकर्त्रा ॥

कस्य मरौ दुरधिगमः कमले कः कथय विरचितावासः ।
कैस्तुष्यति चामुण्डा रिपवस्ते वद कुतो भ्रष्टाः ॥ ३१ ॥

कस्य इत्युत्तरम् । क जलं तस्य । को ब्रह्मा इत्युत्तरम् । कैर्मस्तकैरित्युत्तरम् । कुतः । पृथ्व्या सकाशादित्युत्तरम् । पृथ्व्याधिकारात्पतिता इत्यर्थः ।

इति कथितापह्नुतिजातिः ।

यत्र भङ्गस्य वैषम्यं विषमं तन्निगद्यते ।

यत्र प्रश्ने भङ्गस्य रचनाया दुष्करत्वं भवति तत् विषमं पृष्टम् ॥

कीदृग्वनं स्यान्न भयाय पृष्टे यदुत्तरं तस्य च कीदृशस्य ।
वाच्यं भवेदीक्षणजातमम्बु कं चाधिशेते गवि कोऽर्चनीयः ॥३२॥

अहिंस्रमहिमः ॥ अहिंस्र न सन्ति हिंस्राः घातुका जीवविशेषाः यस्मिन् तत् । अहिम न विद्यते हिम् अहिम् तस्य अहिम मतः । कोऽर्थः । यदा अहिंस्रशब्दात् हिम् दूरीक्रियते तदा अस्रं इति तिष्ठति । अस्रं नेत्रजलं अश्रुपात । अहिं शेषनागम् । अः कृष्ण पूज्य सन् अधिशेते ॥

प्रायः कार्ये न मुह्यन्ति नराः सर्वत्र कीदृशाः ।
नाधा इति भवेच्छब्दो नौवाची वद कीदृशः ॥ ३३ ॥

सावधानाः ॥ सह अवधानेन समाधिना वर्तन्त इति सावधानाः । 'समाधिर्नियमे ध्याने' इत्यमर । अव्यग्रचित्ता इत्यर्थः । सौ अधा ना स् इति पदच्छेदः । अस्यार्थः–औकारेण सहवर्तमानः सौ नधा अधा धारहितः एवंविध. ना इति शब्द. । सकारस्य विसर्ग । नो इति नौवाचि भवेदिति योजना । अस्यायं विधिः—नाधा इत्यत्र ना धा इति भिन्नौ लिख्येते ना इति सौ औकारेण सहित क्रियते तदा नौ इति स्यात् । अधा धा इति दूरीक्रियते स् इत्यस्य विसर्गः क्रियते । नौः इत्येवं सिध्यति नौकावाची जातः ॥

इति विषमजातिः ।

वृत्तनामोत्तरं पृष्टं भवेत्तद्वृत्तनामकम् ॥ ३४ ॥

वृत्ताना छन्दसा नाम यस्मिन् उत्तरे तत् वृत्तनामकं पृष्टम् ॥

गतक्लेशायासा विमलमनसः कुत्र मुनय-
स्तपस्यन्ति स्वच्छाः सुररिपुरिपोः का च दयिता ।
कविप्रेयः किं स्यान्नवलघुयुतैरष्टगुरुभि-
र्बुधा वृत्तं वर्णैः स्फुटघटितबन्धं कथयत ॥ ३५ ॥

शिखरिणी ॥ शिखराणि विद्यन्ते यस्मिन्नसौ शिखरी तस्मिन् । शिखरिणि पर्वते । ई लक्ष्मी । शिखरिणीछन्दः ॥

उरसि मुरभिदः का गाढमालिङ्गितास्ते
सरसिजमकरन्दामोदिता नन्दने का ।
गिरिसमलघुवर्णैरर्णवाख्यातिसंख्यै-
र्गुरुभिरपि कृता का छन्दसा वृत्तिरम्या ॥ ३६ ॥

मालिनी ॥ मा लक्ष्मी । अलिनी भ्रमरी । मालिनी नाम छन्दोवृत्तम् ॥

इति वृत्तनामजातिः ।

एकमेवोत्तरं यत्र सुश्लिष्टत्वाद्द्विधा भवेत् ।
सुप्तिङन्तप्रभेदेन नामाख्यातं तदुच्यते ॥ ३७ ॥

सुबन्ततिङन्तयोर्भेदेन सुगुप्तत्वाद्द्विधा भवेत् यत्र प्रश्ने एकमेवोत्तरं तत् नामाख्यातं पृष्टम् । नाम च आख्यात च नामाख्याते ते विद्येतेऽस्मिन् तत् ॥

समरशिरसि सैन्यं कीदृशं दुर्निवार
विगतघननिशीथे कीदृशे व्योम्नि शोभा ।
कमपि विधिवशेन प्राप्य योग्याभिमान
जगदखिलमनिन्द्य दुर्जनः किं करोति ॥ ३८ ॥

अभिभवति ॥ अभि नास्ति भीर्यस्य तत् भयरहितं भवति । भानि नक्षत्राणि विद्यन्ते यस्मिन् तत् भवत् तस्मिन् भवति नक्षत्रयुक्ते अभिभवति पराभवति । नीचो वृद्धिं गतो दुःखदायक एव भवेदिति नीतिः । प्रथमपुरुषैकवचनम् ॥

पदमनन्तरवाचि किमिष्यते
कपिपतिर्विजयी ननु कीदृशः ।
परगुणं गदितुं गतमत्सराः
कुरुत किं सततं भुवि सज्जनाः ॥ ३९ ॥

अनुसरामः ॥ अनु पश्चाद्वाचि । रामेण सहवर्तमानः सरामः । अनुसरामः वय परमगुणं प्रति अनुसरणं कुर्मः । उत्तमपुरुषबहुवचनम् । लट् ॥

वदति राममुष्य जघन्यजो वसति कुत्र सदालसमानसः ।
अपि च शक्रसुतेन तिरस्कृतो रविसुतः किमसौ विदधे त्वया ॥ ४० ॥

अनुजगृहे ॥ हे अनुज भ्रातः । गृहे वसति । राम आह–मया अनुजगृहे अनुगृहीतः ॥

भवति गमनयोग्या कीदृशी भू रथानां
किमतिमधुरमम्लं भोजनान्ते प्रदेयम् ।
प्रियतम वद नीचामन्त्रणे किं पदं स्या-
त्कुमतिकृतविवादाश्चक्रिरे किं समर्थैः ॥ ४१ ॥

समादधिरे ॥ समा अविषमा । दधि क्षीरजम् । रे इति नीचसंबोधने दीयते । रे दास । समादधिरे समानत्वेन स्थापिता । विवादस्य वा समाधान कृतम् ॥ **लिट्** ॥

वदतानुत्तमवचनं ध्वनिरुच्चैरुच्यते स कीदृक्षः ।
तव सुहृदो गुणनिवहे रिपुनिवहं किं नु कर्तारः ॥ ४२ ॥

अवमंतारः ॥ अवम नीचार्थवाचकम् । तार तारोऽत्युच्चैर्ध्वनिः । अवमन्तार । अस्मिन्मित्राणि रिपूणामपमानं करिष्यन्तीत्यर्थः । तारम् इत्यस्य रूपम् ॥

कीदृक्तोयं दुस्तरं स्यात्तितीर्षोः
का पूज्यास्मिन्खड्ग मामन्त्रयस्व ।
दृष्ट्वा धूमं दूरतो मानविज्ञाः
किं कर्तास्मिन्प्रातरेवाप्रयासम् ॥ ४३ ॥

अनुमातासे ॥ न विद्यते नौ यत्र तत् अनु । नौकारहितमित्यर्थ । माता जनित्री । हे असे हे खड्ग । अनुमातासे त्वमनुमानं करिष्यसि ॥ **लुट्** ॥

कामुकाः स्युः कया नीचाः सर्वे कस्मिन्प्रमोदते ।
अर्थिनः प्राप्य पुण्याहं करिष्यध्वे वसूनि किम् ॥ ४४ ॥

दास्यामहे ॥ दास्या । दासी चात्र मौल्येन क्रीता वेश्या वा गृह्यते । महे महोत्सवे । 'मह उद्धव उत्सव ' इत्यमरः । वय दास्यामहे दानं दास्याम ॥

को दुःखी सर्वकार्येषु किं भृशार्थस्य वाचकम् ।
यो यस्माद्विरतो नित्यं ततः किं स करिष्यति ॥ ४५ ॥

प्रयास्यति ॥ प्रयास आयासोऽस्यास्ति सः प्रयासी । अति अत्यर्थे प्रसिद्धः । प्रयास्यति प्रकर्षेण तत् स्थान विमुच्य गमिष्यति ॥ **लृट्** ॥

विद्यन्त इति समानार्थः शब्दः को चिरयति मुद्रां किम् ।
कथमपि यदि ते कोपः स्यात्त्वां सुजन किं करोतु वद ॥ ४६ ॥

संत्यजतु ॥ सन्ति विद्यन्ते । अजतु अलाक्षा । लाक्षाव्यतिरिक्तमन्यत्किंचिदपि मुद्रिकामणिं स्थापयितु न च शक्नोति । अयं भावार्थ । सत्यजतु सः मा सत्यज्य दूरेण गच्छतु इत्यर्थः ॥

मेघात्यये भवति का सुभगावगाह्या
वृत्तं वसन्ततिलका कियदक्षराणाम् ।

भो भो कदर्यपुरुषा विषुवद्दिनं च
वित्तं च वः सुबहु तत्क्रियतां किमेतत् ॥ ४७ ॥

नदीयतां ॥ नदी प्रसिद्धा । इयतां एतत्परिमाणमेषां तानि इयन्ति तेषां एतावदक्षराणामेव भवति । अस्माभिर्न दीयताम् ॥ **लोट्** ॥

का माद्यति मकरन्दैस्तनयं कमसूत जनकराजसुता ।
कथय कृषीवल सस्यं पक्वं किमचीकरस्त्वमपि ॥ ४८ ॥

अलीलवं ॥ अली भ्रमरः । लवं लवनामानं पुत्रम् । अहं अलीलवं छेदनमकारयम् ॥

पृच्छति पुरुषः केऽस्यां समभूवन्वज्रकृत्तपक्षतयः ।
बहुभयदेशं जिगमिषुरेकाकी वार्यते स कथम् ॥ ४९ ॥

मानवनगाः ॥ हे मानव । नगाः पर्वताः । इन्द्रेण हि पर्वतानां पक्षच्छेदः कृतः इति पौराणिका वदन्ति । मानवनगा हे अनवन न विद्यते अवनं रक्षणं यस्य स अनवनः तत्सबोधनं हे अरक्षक, त्वं मागाः गमनं मा कुर्याः ॥ **लुङ्** ॥

किमकरवमहं हरिर्महीध्रं
स्वभुजबलेन गवां हितं विधित्सुः ।
प्रियतमवदनेन पीयते कः
परिणतबिम्बफलोपमः प्रियायाः ॥ ५० ॥

अधरः ॥ हे कृष्ण, त्वं गोवर्धनपर्वतं अधरः हस्ते धृतवान् । अधरः ओष्ठः ॥

परिहरति भयात्तवाहितः कं
कमथ कदापि न विन्दतीह भीतः ।
कथय किमकरोरिमां धरित्रीं
नृपतिगुणैर्नृपते वरस्त्वमेकः ॥ ५१ ॥

समरंजयं ॥ समरं सङ्ग्रामम् । जयं जयवादम् । अहं समरंजयं रागिणीं पृथ्वीमकरवम् ॥ **लङ्** ॥

कीदृक्सेना भवति रणे दुर्वारा
वीरः कस्मै स्पृहयति लक्ष्मीमिच्छन् ।
का संबुद्धिर्भवति भुवः संग्रामे
किं कुर्वीध्वं सुभटजना भ्रातृव्यान् ॥ ५२ ॥

पराजयेमहि ॥ परा उत्कृष्टा । उत्कृष्टा एव सेना जयं प्राप्नुयादित्यर्थः । आजये संग्रामाय । हे महि हे पृथ्वि । वयं पराजयेमहि जयेम ॥

कंसारातेर्वद गमनं केन स्या-
त्कस्मिन्दृष्टिं संलभते स्वल्पेच्छुः ।

कं सर्वेषां शुभकरमूचुर्धीराः
किं कुर्यास्त्वं सुजन सशोकं लोकम् ॥ ५३ ॥

विनोदयेयं ॥ विना गरुडेन । उदये सति परस्योन्नतौ सत्यां । अयं भाग्य । अयमित्यकारान्तशब्दस्य द्वितीयैकवचनम् । अहं तं विनोदयेयं विनोदेन युक्तं कुर्यामित्यर्थ. । विधिसभावनयो **लिङ्** ॥

वारणेन्द्रो भवेत्कीदृक्प्रीतये भृङ्गसंहतेः ।
यद्यवक्ष्यं तदास्मै किमकरिष्यमहं धनम् ॥ ५४ ॥

समदास्यः ॥ समदं मदसहितं आस्यं मुखं यस्य स । भ्रमरा हि गजाना मदमाघ्राय हृष्यन्ति । समदास्य त्वं दानं व्यतिरिष्य ॥

काले देशे यथायुक्तं नरः कुर्वन्नुपैति काम् ।
भुक्तवन्तावलप्सेतां किमन्नमकरिष्यताम् ॥ ५५ ॥

अहास्यतां ॥ हास्यस्य भावो हास्यता न हास्यता अहास्यता ताम् । युक्तक्रिया कुर्वतो न कश्चिद्धसेदित्यर्थ । अहास्यता 'ओहाक् त्यागे' क्रियातिपत्तौ स्यप् । तदन्नं तावत्त्यक्ष्यतामित्यर्थ ॥ **लृङ्** ॥

इति नामाख्यातजातिः ।

ज्ञेयं तार्क्यदृशा तार्क्यं सौत्रं सूत्रोत्तरैस्तथा ।
शाब्दीयं शब्दसंज्ञाभिः शास्त्रजं शास्त्रभाषया ॥ ५६ ॥

तर्कशास्त्रे भवं तार्क्यं पृष्टम् ॥

हिमानीस्थगिरौ स्याता कीदृशौ शशिभास्करौ ।
कः पूज्यः कः प्रमाणेभ्यो न प्रभाकरसंमतः ॥ ५७ ॥

अभावः ॥ अभौ नास्ति भा दीप्तिर्ययोस्तौ कान्तिरहितौ । अः कृष्ण. । अभावः प्रमाणशास्त्रे प्रसिद्ध । अभावो नाम सप्तम· पदार्थः । प्राभाकरास्तु अभावरूपं सप्तमं पदार्थं प्रमाणत्वेन न मन्यन्ते ॥

के प्रवीणाः कुतो हीनं जीर्णं वासोऽशुमांश्च कः ।
निराकरिष्णवो बाह्यं योगाचाराश्च कीदृशाः ॥ ५८ ॥

विज्ञानवादिनः ॥ विज्ञा विशेषेण जानन्ति ते चतुरा· । नवात् नूतनात् । जीर्णं हि वस्त्रं नवात् हीनमूल्य स्यादित्यभिप्राय । इनः सूर्यः । विज्ञानवादिन· विशेषेण ज्ञानस्य तत्त्वार्थज्ञानस्य वादो विद्यते येषु ते विज्ञानवादिन इति पदं तर्कशास्त्रे प्रसिद्धत्वात् तार्क्यजातिरिति । सूत्रे भवं सौत्र पृष्टम् ॥

इति तार्क्यजातिः ।

को नयति जगदशेषं क्षयमथ बिभरांबभूव कं विष्णुः ।
नीचः कुत्र सगर्वः पाणिनिसूत्रं च कीदृक्षम् ॥ ५९ ॥

यमोगंधने ॥ यम· कृतान्त । अगं परिशेषाद्गोवर्धनम् । धने द्रव्ये । 'यमो गन्धने' पाणिनीयव्याकरणमध्ये इदं सूत्रमस्ति ॥

किं स्याद्विशेष्यनिष्ठं का संख्या वदत पूरणी भवति ।

नीचः केन सगर्वः सूत्रं चन्द्रस्य कीदृक्षम् ॥ ६० ॥

विशेषणमेकार्थेन ॥ विशेषणम् । एका । शून्याना सख्यापूरकं एकमेव भवति । एकादिरङ्को लिख्यते तदा बिन्दूना साफल्य स्यादन्यथा शून्यमेव । अथवा एकद्विव्या-दिका सख्या । अथवा ऊनानामेकत्रिपश्चादीनां पूरण्येका एव सख्या समसंज्ञा कर्त्री भवेदित्याकूतम् । अर्थेन द्रव्येण । 'विशेषणमेकार्थेन' इदं चन्द्रव्याकरणसूत्रमस्तीति ॥

इति सौत्रजातिः ।

शब्दानामिदं शाब्दीयं व्याकरणम् ॥ शाब्दे भवं शाब्दीय पृष्टम् ॥

न श्लाघते खलः कस्मै सुप्तिङन्तं किमुच्यते ।

लादेशानां नवानां च तिङां किं नाम कथ्यताम् ॥ ६१ ॥

परस्मैपदम् ॥ परस्मै आत्मव्यतिरिक्त. पर. अन्यस्मै न स्तौति । पदं पदसंज्ञ सुप्तिङन्तं पदम् । परस्मैपदम । नवाना अपि तिङा तिप्तसअन्ति इत्यादीना परस्मैप-दसंज्ञा ॥

सततं श्लाघते कस्मै नीचो भुवि किमुत्तमम् ।

कर्तर्यापरुचादीनां धातूनां किं पदं भवेत् ॥ ६२ ॥

आत्मनेपदम् ॥ आत्मने स्वस्मै । पदं प्रतिष्ठास्थानम् । आत्मनेपदम् ते आते अन्ते इत्यादीनि नववचनानि भवन्तीति भावार्थ ॥

किमव्ययतया ख्यातं कस्य लोपो विधीयते ।

ब्रूत शब्दविदो ज्ञात्वा समाहारः क उच्यते ॥ ६३ ॥

स्वरितः ॥ स्वर् स्वरव्यय स्वर्गे निपात । इत इत्संज्ञकस्य । स्वरित· । ह्रस्वादयस्त्रय स्वरा. प्रत्येकमुदात्तानुदात्तस्वरितसंज्ञा । समाहार स्वरित इति तात्पर्यार्थः ॥

इति शाब्दीयजातिः ।

शास्त्राज्जात शास्त्रजं पृष्टम् ॥

मेघात्यये भवति कः समदः सुभग च किं कमधरन्मुरजित् ।

कटुतैलमिश्रितगुडो नियतं विनिहन्ति कं त्रिगुणसप्तदिनैः॥६४॥

श्वासरोगम् ॥ श्वा मशक तेषु दिनेषु मैथुनेच्छो भवेत् । सरस्तडागम् । अग गोवर्धनपर्वतम् । श्वासरोगम् ॥

कीदृक्प्रातर्दीपवर्तेः शिखा स्या-

दुष्ट्रः पृच्छत्याभजन्ते मृगाः किम् ।

देवामात्ये किं गते प्रायशोऽस्मि-

ल्लोकः कुर्यान्नो विवाहं विविक्तः ॥ ६५ ॥

विभाकरभवनम् ॥ विभा विगता भा कान्तिर्यस्यां सा । हे करभ उष्ट्र । वनम् । विभाकरभवन विभाकरस्य सूर्यस्य भवनं गृह तत् । सिंहराशिं गते जीवे लोका विवाहादिशुभकार्याणि न कुर्वन्ति । सिंहस्याधिपतिः सूर्यः ॥

इति शास्त्रजजातिः ॥

वर्ण एवोत्तरं यत्र तद्वर्णोत्तरमुच्यते ।
वाक्यं यत्रोत्तरं तत्तु वाक्योत्तरमिति स्मृतम् ॥ ६६ ॥

वर्ण. एकाक्षरमेव उत्तर यस्मिन् तत् वर्णोत्तरं पृष्टम् ।

कौ विख्यातावहे: शत्रू शोकं वहति किं पदम् ।
कोऽभीष्टोऽतिदरिद्रस्य सेव्यन्ते के च भिक्षुभिः ॥ ६७ ॥

वीहाराः ॥ 'अहे शत्रू' इति पाठे विश्च विश्च वी गरुडमयूरौ । 'कौ शत्रू भुवि विख्यातौ' इति पाठे उश्च इश्च वी ईश्वरकंदर्पौ । हा इति खेदे । रा द्रव्यम् । वीहारा तीर्थभूमय प्रासादा. देवायतनानि वा ॥

किं मुञ्चन्ति पयोवाहा· कीदृशी हरिवल्लभा ।
पूजाया किं पदं कोऽग्निः कः कृष्णेन हतो रिपुः ॥ ६८ ॥

कंसासुरः ॥ क जलम् । सा एन कृष्णेन सह वर्तमाना लक्ष्मी । सु पूजायाम्' । रोऽग्नि । कसासुर कंसासुरनामा दैत्य ॥

इति वर्णोत्तरजातिः ॥

वाक्यमेव उत्तर यस्मिन तत् वाक्योत्तरं पृष्टम् ॥

दधौ हरिः क शुचि कीदृगभ्रं
पृच्छत्यकः किं कुरुते सशोकः ।
श्लोकं विधायापि किमित्युदारः
कविर्न तोषं समुपैति भूयः ॥ ६९ ॥

अगमकमकरोदिति ॥ 'तिङ्सुबन्तचयो वाक्यम्' इत्यमर । अग गोवर्धनपर्वतम् । न विद्यते क जल यत्र तत् अकम् । हे अक न विद्यते क. सुखं यस्य स हे दुःखिन् । रोदिति रोदन करोति । अगमकमकरोदिति । एनं श्लोकं अगम्यं अकरोत् इति विचारयन् तुष्टो न भवति । इदं वृत्त मयापि दुर्बोधम् ॥

लक्ष्मीधरः पृच्छति कीदृशः स्या-
न्नृपः सपत्नैरपि दुर्निवारः ।
अकारि किं ब्रूहि नरेण सम्यक्
पितृत्वमारोपयितुं स्वकीयम् ॥ ७० ॥

समजनितनयः ॥ हे सम मा लक्ष्मीस्तया सहवर्तमान समः । हे लक्ष्मीधर । हे धनवन् वा । हे कृष्ण । जनित कृतो नयो न्यायो येन स. जनितनयः । समजनि तनय तनय· पुत्र समजनि उत्पादितः ॥

इति वाक्योत्तरजातिः ॥

इति द्वितीय परिच्छेदः ।

तृतीयः परिच्छेदः ।

श्लोक एवोत्तरं यत्र तच्छ्लोकोत्तरमुच्यते ॥ १ ॥

श्लोक एवोत्तरं यत्र तत् श्लोकोत्तर पृष्टम् ॥

कं देवं केऽर्चयन्ति स्फुटरुचि निशि किं कीदृशी दुःखिनी स्त्री
कीदृक्चक्रं सदास्ते क्व च तव विजयी प्रावृषं कीदृशं खम् ।
कामाहुः प्रेतयोग्यां कथय सुकृतिनः कीदृशाः स्युः पुमांसः
कं दत्ते कं च धत्ते गगनतलमलं प्रेक्षणीयं जनानाम् ॥ २ ॥

प्लक्षः कीदृक् चकास्ति स्फुटनवकुसुमाशोकमासाद्य कालं
किं मुञ्चन्त्यम्बुवाहा भवदरिनिवहे संज्वरः किंभवश्च ।
किं नेत्रप्रावृति स्यादतिशयलघवः के च को व्रीहिभेदः
प्रायेण प्रावृषेण्याः प्रियतमदिवसाः कीदृशाः कीदृशाः स्युः ॥३॥

अंजनाभमहावारिवाहौघनिचिताम्बराः । कदंबकंदलीकंदरजःपक्ष्मलवायवः ॥ अं कृष्णम् । जना लोका । भं नक्षत्रम् । नास्ति हावो मुखविकारो यस्या. सा अहावा । अराणि विद्यन्ते यस्मिन् तत् अरि । बाहौ हस्ते । घनो मेघोऽस्यास्ति तत् घनि । चिता । वरा श्रेष्ठा । एक कद क जलं ददाति स कदो मेघस्तम् । द्वितीय बक पक्षिणम् । दलानि पर्णानि विद्यन्ते यस्य स दली । कं जलम् । दराद्भयाज्जातो दरज. । 'पक्ष्म स्यान्नेत्ररोमणि' । लवा. ह्रस्वकणा । यवो धान्यभेद । अञ्जनाभमहावारिवाहौघनिचिताम्बरा ।अञ्जनाभा कज्जलवर्णा ये महावारिवाहा मेघास्तेषामोघेन समूहेन निचित व्याप्तं अम्बर आकाश येषु दिवसेषु ते कदबकदलीकंदरज पक्ष्मलवायवः कदम्बाना वृक्षविशेषाणा कन्दलीकन्दाना च वनस्पतिविशेषाणा वा रजोभिः परागै पक्ष्मला पुष्टा वायवो येषु ते ॥

कुर्यादुद्वेगवन्तं कमपि निशि सरः कीदृशं कास्ति वक्रे
वक्ता निन्द्यः कया स्यात्परिषदि नियतं मन्दसंबोधनं किम् ।
वर्णोपान्त्यं कमूचुः किमसुररिपुणा नन्दगोपालयेऽस्तं
क. प्रालेयाद्रिपुत्रीकुचकलशलुठत्पाणिरेणाङ्कमौलिः ॥ ४ ॥

कीदृकस्येह बन्धुः सुकृतमपहरत्प्रेयसी का युगान्ते
कीदृग्भीतिं विधत्ते धनुरवनिरुहं कंचिदामन्त्रयस्व ।
दैत्यः कंसद्विषा कः कथय विनिहतो गद्गदः कः प्रतीतः
कीदृक्कीदृग्वसन्तः प्रियतम भवतः प्रीतये नित्यमस्तु ॥ ५ ॥

कोकिलालापवाचालसहकारमनोहरः । अशोकस्तबकालीनमत्तालिमधुरस्वरः ॥ कोकि कोकाश्चक्रवाकाः पक्षिणो विद्यन्ते यस्मिन् तत् ।

लाला लाल इति प्रसिद्धम् । अपवाचा हीनवाण्या । हे अलस । हकारं मात्रिकायासु शषसह इति हकारस्यान्तत्वम् । अनः शकटम् । हरो रुद्र । अशोकः शोकरहितो भ्राता । तव भवतो भवति । काली संहारकर्त्री देवी । नमत् नमनशीलम् । हे तालि ताडनाम प्रसिद्धम् । मधुः मधुनामा दैत्य. । अस्वरः शब्देन रहित । कोकिलालापवाचालसहकारमनोहर कोकिलाना पिकानामालापेनान्योन्यजल्पनेन वाचालः सशब्दा ये सहकारा आम्रवृक्षास्तैर्मनो हरति स । अशोकस्तबकालीनमत्तालिमधुरस्वर अशोकाना वृक्षविशेषाणा स्तबके गुच्छे आलीना अभिव्याप्ता ये मत्ता अलयो भ्रमरास्तेषा मधुरोऽतिमिष्ट स्वरो ध्वनिविशेषो यस्मिन्स ॥

इति श्लोकोत्तरजातिः ।

खण्डोत्तरं भवेदर्धं

खण्डमर्धमेव उत्तर यस्मिन तत् खण्डोत्तर पृष्टम् ॥

का चक्रे हरिणा धने कृपणधीः कीदृग्भुजगेऽस्ति किं
कीदृक्कुम्भसमुद्भवस्य जठरं कीदृग्गियामुर्वधूः ।
श्लोकः कीदृगभीप्सितः सुकृतिना कीदृङ् नभो निर्मलं
क्षोणीमाह्वय सर्वगं किमुदितं रात्रौ सरः कीदृशम् ॥ ६ ॥

कुमुद्वनपरागरंजितांभो विहितगमागमकोकमुग्धरेखम् । कुमुद् पृथ्व्या. हर्षोऽकारि । पृथ्वी उद्धृता इत्यर्थ । अवनपरा अवन रक्षणं धनस्य गोपनं तत्र परा सावधाना । गर विषम् । जिनानि पीतानि अम्भांसि जलानि येन तत् जिताम्भ । विहितगमा विहित कृतो गमो गमन यया सा । गमक अर्थाभिप्रायेण गम्यते प्राप्यते स गमक । कमुक् क पानीय मुञ्चन्ति ते कमुचो मेघा । न विद्यन्ते कमुचो यस्मिन् तत मेघै रहितमित्यर्थ । हे धरे हे पृथ्वि । खं आकाशम् । कुमुदवनपरागरंजिताभो विहितगमागमकोकमुग्धरेख कुमुदाना चन्द्रविकासिकमलाना वनानि तेषा परागेण सुगन्धेन किंजल्केन वा रंजितं रङ्गयुक्तं कृतं अम्भो जलं यस्मिंस्तत् ईदृशं सर । प्रथमविशेषणम् । पुन कीदृशम् । विहितौ निष्पादितौ गमागमौ गमनागमने याभ्या तौ विहितगमागमौ तौ च तौ कोकौ च ताभ्या कृता मुग्धा सुन्दरा रेखा पङ्क्तिर्यस्मिन् तत् यतस्तौ चक्रवाकीचक्रवाकावन्योन्यं वियुक्तौ सन्तौ रात्रौ मिलनाय तीरात्तीर पर्यटत । तयोर्गमनागमनेन जलरेखाया भवात् रात्रौ सर ईदृशं इति भाव ॥

मुण्डः पृच्छति कि मुरारिशयनं का हन्ति रूपं नृणां
कीदृग्वीरजनश्च कोऽतिगहनः संबोधयावञ्चितम् ।
का धात्री जगतो बृहस्पतिवधूः कीदृक्कविः कादृतः
कोऽर्थः किं भवता कृतं रिपुकुलं कीदृक्सरो वासरे ॥ ७ ॥

इति खण्डोत्तरजातिः ।

विकचवारिजराजिसमुद्भवोच्छलितभूरिपरागविराजितं । हे विकच विगताः कचाः केशा यस्य स. तत्संबोधनम् । हे बालरहित । वारि जलम् । महाप्रलये हरिः शेषशय्याया समुद्रजले शेते । जरा वृद्धत्वम् । आजिसमुद् आजौ संग्रामे समुत् सहर्षः । भवः संसारः । हे अच्छलित हे अवञ्चित । भू. पृथ्वी । इप-रा इ. कामस्तेन परा उत्कृष्टा नित्ययौवनवती । गवि वाण्याम् । रा· द्रव्यम् । जितं सुगमम् । विकचवारिजराजिसमुद्भवोच्छलितभूरिपरागविराजितं विकचानां प्रफुल्लि-ताना वारिजाना कमलाना राजिः पङ्क्तिस्तस्याः समुद्भव उत्पन्न उच्छलितो यो भूरि· प्रचुरः पराग सौगन्ध्यं तेन विराजितं शोभितम् ॥

श्लोकात्पादात्तदुत्तरम् ।

पाद श्लोकचतुर्थांश एव उत्तरं यस्मिन् तत्पादोत्तर पृष्ठम् ॥

विभर्ति वदनेन किं क इह सत्वपीडाकरं
कुलं भवति कीदृशं गलितयौवनं योषिताम् ।
बभार हरिरम्बुधेरुपरि कां च केन स्तुते
हतः कथय कस्त्वया नगपतेर्भयं कीदृशान् ॥ ८ ॥

विषमपादनिकुंजगताहितः ॥ विषं गरलम् । अपात् न सन्ति पादाश्चरणा यस्य स सर्प । अनि नास्ति इ कामो यस्मिन् तत् अनि कंदर्परहितम् । कु पृथ्वी-म् । जगता ससारेण । अहित शत्रु विषमपादनिकुञ्जगताहित· विषमाना दुर्गमाणा पादानां प्रत्यन्तपर्वताना निकुञ्जेषु गहनस्थानेषु गता अहय सर्पा यस्मिन् स विष-मपादनिकुञ्जगताहिस्तस्मात् यत्र पर्वते शिलाया अधस्तात्सर्पा निर्गच्छन्ति तत पर्वताद्बिभीयते ॥

हरिर्वहति कां तवास्त्यरिपु का गता कं च का
कमर्चयति रोगवान्धनवती पुरी कीदृशी ।
हरिः कमधरद्बलिप्रभृतयो धरां कि व्यधुः
कया सदसि कस्त्वया बुधजितोऽम्बुधिः कीदृशः ॥ ९ ॥

कुंभीरमीनमकरागमदुर्गवारिः ॥ कुं पृथ्वीम् । भीः भयम् । ई लक्ष्मी । अं विष्णु गता । इनं सूर्यम् । अकरा नास्ति करो राजदण्डो यस्या सा । अगं गोवर्धनप-र्वतम् । अदुः ददति स्म । गवा वाण्या वादेन कृत्वारि प्रतिवादी जित. । कुम्भीरमीनम-करागमदुर्गवारि कुम्भीराः नक्राश्च मीना· मत्स्याश्च मकराश्च कुम्भीरमीनमकरास्तेषा आगमौ आगमनगमने ताभ्यां कृत्वा दुर्गं दुस्तरं वारि जलं यस्यासौ । ईदृश· समुद्रो भवति ॥

इति पादोत्तरजातिः ।

चत्वार्यराणि पादाभ्यां नेमिं पादद्वयेन च ।
लिखित्वा दक्षिणावर्तं चक्रं प्रश्नमवेहि मे ॥ १० ॥

चक्रेण रथपादेन सदृशं श्लोकबन्ध विधाय प्रश्न क्रियते । इत्यतश्चक्रप्रश्नम् ॥

कं चौरस्य च्छिनत्ति क्षितिपतिरनघः किं पदं वक्ति कुत्सां
क्षोणीसंबोधनं किं वदति कमलभूः का च विश्वं बिभर्ति ।
चक्राङ्कामन्त्रणं किं कथमपि सुजन. किं न कुर्यादनार्ये
कीदृग्भोक्तुः पुरं स्यात्पयसि वद कुतो मीनपङ्क्तिर्बिभेति ॥ ११ ॥
किं स्वच्छं शारदं स्याद्वदति वृषगतिः कोऽशुमाली पवित्रः
कोऽस्मिन्कि जीवनं का विरचयति कविर्वह्निसंबोधनं किम् ।
नाकाङ्क्षन्ति स्त्रियः कं तनुरसुररिपोः कीदृशी कश्च मूकः
सम्यक्प्रीति तडाग. प्रियतम तनुते कीदृशः कीदृशस्ते ॥ १२ ॥

करंकुकोककुररकलहंसकरंबितः । सरोजकोमलोद्गारनीरसंसक्तमारुतः ॥ कर हस्तम् । कुकुशब्दो निन्दार्थ । कुपुरुष. । हे को हे पृथ्वि । हे क हे ब्रह्मन्।कु पृथ्वी।हे अर 'आरा' इति लोकभाषा। कलहं वाग्युद्धम्। सकरं दण्डयुक्तम्। वित वकादिपक्षिण सकाशात्। सरस्तडागम्। हे अज हे शंभो। क सूर्य।अमल. मलरहित। निर्मल इत्यर्थं। उद् उदकम्। गी वाणी। हे र हे अग्ने। नीरस निर्गतो रस शृङ्गारात्मको यस्मात् स नीरसस्तम्। सक्तमा सक्ता लग्ना मा लक्ष्मीर्यस्या सा। अरुत. न विद्यते रुत शब्दो जल्पनं यस्मिन्स । करंकुकोककुररकलहसकरंबित । करकव पक्षिविशेषाश्च कोकाश्चक्रवाकश्च कुररा. क्रौञ्चाश्च कलहंसा. हसविशेषाश्च एतै पक्षिसमूहै करम्बितो व्याप्तस्तडागः प्रीतिकरो भवेदित्याशय. । पुन कीदृशस्तडाग । सरोजकोमलोद्गारनीरससक्तमारुतः सरोजाना कमलोऽधिकसौरभ्यवान् य उद्गारः उद्गिरण नि श्वाससदृश यस्मिन् तत्। अर्थात्परिमलवत् यन्नीरं जलं तेन सक्तो मारुतो वायुर्यस्मिन् तडागे स ॥

इति चक्रजातिः ।

वर्णद्वयद्वयैकैकदलभूतदलाष्टकम् ।
सर्वोत्तराद्यवर्णेन पद्मं स्यात्कृतकर्णिकम् ॥ १३ ॥

अष्टदलैर्नालेन च सहित पद्मं प्रश्नोत्तरम् ।

पुण्यात्मा वद कीदृशः सरसिजैः के मोदिताः कीदृश-
स्त्वद्वैरी गतचक्षुषः कुलमभूत्कीदृक्त्वया के जिताः ।
बद्धालिः सलिलाशयः कथय भोः कीदृक्च आक्षेपवा-
क्शब्दः कुत्र न तस्करादिकभयं दृत्ते भवेत्प्रायशः ॥ १४ ॥

अप्पित्तं गवि कीदृशं निगदितो मुक्तः पुमान्कीदृशः
कस्माद्बिभ्यति कौशिका भुवि कृतः कीदृक्त्वया तस्करः ।
हस्ती स्यान्ननु कीदृशो बहुमतः शोच्यो रणः कीदृशः
कीदृक्षः पुरुषः पराप्रतिहतः कीदृग्भवेद्वासुकिः ॥ १५ ॥

अलयः । अपश्यत् । अरयः । अबन्धः । अहस्तः । अगजः । अहीनः ॥ अलय· ए कृष्णे लयो ध्यानविशेषो यस्य सः । अलयो भ्रमराः । अपश्यन् 'शीङ् स्वप्ने' 'अद् भक्षणे' शी शयन अत् शीश्च अश्च श्यति अपगते श्यती शयनभक्षणे यस्यासौ अपश्यत् । मच्छत्रु रात्रौ शयनं दिवसे चादन न करोति । भयभीतत्वात् । न पश्यति विलोकयति तत् अपश्यत् । अरय शत्रवः । अरय नास्ति रयो वेगो यस्य स अबन्ध. अपा पानीयाना अन्धो भक्षण यस्य तत् सकारान्तः । नास्ति बन्धो रज्ज्वादेर्बन्धन यस्यासौ अबन्ध । बन्धनरहित इत्यर्थ । अररे अरे इत्यर्थे अररे इति निपात । अरे नीच हीनसबोधने दीयते । अररे कपाटे । 'कपाटमरर तुल्ये' इत्यमरः । अर्थात् कपाटे दत्ते सति गृहान्तस्तस्करादेर्भय न भवेदित्यभिप्राय । अहस्त दिवमात् । नास्ति हस्तौ यस्यासौ अहस्त हस्ताभ्या रहित· । अगज अगेषु पर्वतेषु जातोऽगज पर्वतसबन्धी । न विद्यन्ते गजा. हस्तिनो यस्मिन् स अगज । हस्तिरहिता सेना शोभा न लभते इत्यर्थ । अहीन. न हीनोऽहीन । समर्थ इत्यर्थ । अहीन अहीना सर्पाणा इनः स्वामी ॥

इति पश्नोत्तरजातिः ।

काकस्येव पदं त्र्यस्रं यत्तत्काकपदं मतम् ।

काकस्य पद चरणाकृतिरिव त्र्यस्र पद आकारो यस्मिन् तत्काकपदं प्रश्नोत्तरम् ॥

कुतः कः स्यात्कीदृक्कथय विपवैद्य स्फुटमिदं
रिपोः कः कीदृक्षो भवति वशग. कश्च करभः ।
प्रवीणः संबोध्यः सुभग वद कौ रत्नवचनौ
सुरूपे विख्याति जगति महती का गतवती ॥ १६ ॥

नागदरतः । नागतनयः । नागरमणी ॥ नागदरत नागानां सर्पाणा दरो भय तस्मात्, ना पुमान्, गदरतः गदेषु विषापहारेषु तूषधेषु (?) रत आसक्त । अयमभिप्राय —यदा नागेभ्यो भय भवेत्तदा मनुष्यो गदरतो विषवैद्य स्याज्जाङ्गुलीविद्याविशारद स्यात् । कुतश्चित्सर्पकीलनमन्त्रं पठेत् । ना पुमान् गतनय· गतस्त्यक्तो नयो न्यायो नीतिरूपं येनासौ । नागतनय. नागाना हस्तिना तनय· पुत्र· । हे नागर हे विचक्षण । मणी चन्द्रकान्तिप्रमुखौ हीरकौ । नागरमणी नागानां नागकुमारदेवविशेषाणां रमणी· स्त्री । तासा तौ सौन्दर्यविशेषेण श्लाघ्येते ॥

काकपदजातिः ।

तिर्यगन्धोऽन्यरेखाभिर्गोमूत्री द्विपदी द्वये ॥ १७ ॥

गोर्वृषभस्य मूत्रं वक्रगत्या जायते तद्वद्बन्धो यस्या· सा गोमूत्रीप्रश्नोत्तरम् ॥

कामाहुर्युवतीममङ्गलवती कीदृग्ग्रहाणां गतिः
संबोध्या वद मत्स्यवेधनपरः कीदृग्भवेत्पामरः ।
कीदृग्वाल्मिकवेश्म कोऽस्तनमुरो धत्ते सुरैरुच्यते
गीः कीदृङ् न कदापि कम्बुरहितं वाञ्छन्ति कं योषितः॥१८॥
कीदृक्पान्थकुलं तमो हरति का किं चक्रसंबोधनं
रम्या चम्पकशाखिनः कथय का कश्चाटचोऽर्थे भवेत् ।
किं क्षिप्तं बलिवैरिणा मुररिपोः काह्वा श्मशानेऽस्ति का
क्ष्मा कीदृग्भवति स्म पूर्वमधुना कीदृक्पुनर्वर्तते ॥ १९ ॥

अजरामशुभाचारबलिशीलविनोदिता । भुजंगमनिभासारकलिकालजनोचिता ॥ अजरा नास्ति जरा वृद्धत्वं यस्याः सा ताम् । अशुभा शुभकारिणी न भवति । हे चार हे गते । बलिशी बलिशमस्यास्ति स । 'बडिश मत्स्यवेधनम्' इत्यमर । लवि लवो नामा सीतारामयो पुत्रः । लवो विद्यते यस्मिन् तत् लवि । ना पुमान् । उदिता उदय प्राप्ता । यस्य पुरुषस्य यादृश उदयो भवति तस्य तादृशी देववाणी भवेदिति भावः । भुज हस्तम् । गमनि गमन चलन पर्यटन विद्यते यस्य तत् इन्नन्त । भा कान्ति । हे सार मह अरैस्तिर्यक्काष्ठविशेषैर्वर्तमानं सारम् । तत्सबोधनम् । कलिका कोरक । अविकसितकलीत्यर्थ । आलज् प्रत्यय. । 'आलजाटचौ बहुभाषिणि' । अनः शकटम् । हे अ हे कृष्ण । चिता प्रसिद्धा । अजरामशुभाचारबलिशीलविनोदिता अजश्च रामश्चाजरामौ । अजो दशरथपिता, रामश्च सीतापति । तयोः शुभेन आचारेण । तथा बलिराजा प्रसिद्ध वामनेन यो याचित तस्य शीलेन आचारेण च विनोदिता हर्ष प्रापिता इति पूर्वमासीत् । अधुना कीदृगी पृथ्वी । भुजंगमनिभासारकलिकालजनोचिता भुजंगमै सर्पैर्निभास्तुल्याः वक्रगतयो येऽसारा नि सत्वाः कलिकालजनाः कलियुगमनुष्यास्तेषा मनुष्याणामुचिता योग्या ॥

इति गोमूत्रजातिः ।

वर्णैनैकेन च द्वाभ्यां सर्वैर्वा सर्वदिग्गतैः ।
उत्तरं सर्वतोभद्रं दुष्करं तदिदं यथा ॥ २० ॥

सर्वत समन्तात् वर्णस्वरान्संगृह्य प्रश्नोत्तर क्रियतेऽतः स सर्वतोभद्र प्रश्नोत्तरम् ॥

कस्त्यागे धातुरुक्तस्तव रिपुहृदि का भूषणं के स्तनानां
को दु.खी कश्च शब्दो वदति वद शुचं कौ रिपू ख्यातवीर्यौ ।
शृङ्गारी कीदृशः का रणशिरसि भयाद्भङ्गमाप्नोति सेना
को दानार्थाभिधायी शिरसि शिरसि कौ [illegible]तः संप्रहृष्य॥२१॥
कीदृक्कोयार्थिनी स्त्री भवति मदकरः प्राय[illegible] को दृग्[illegible]
कस्मिन्मन्दायतेऽसौ नियतमुडुपतिः प्रेय[illegible]का मरारेः [illegible]

विख्यातौ वाहनौ कौ द्रुहिणमुरभिदोः कीदृगाखेटकश्री
कीदृङ्नैवाचिराभा समिति गतभयाः के गतौ कश्च धातुः॥ २२॥

हारावी ॥ कस्त्याग इति श्लोकद्वये एकोनविंशतिपृष्टानि सन्ति। हारावीत्यक्षरत्रयेष्वेकोनविंशत्युत्तराणि ज्ञेयानि धीमद्भिः। हारावीत्यतएव हृ इति 'ओहाक् त्यागे' ॥ १ ॥ आरा 'आरा चर्मप्रभेदिका' चर्मकाराणा चर्मवेधनशस्त्रम्। शत्रूणा हृदि आरासदृशं दुःख वर्तते ॥ २ ॥ हाराः पुष्पाणा मुक्ताना च हारा प्रसिद्धाः ॥ ३ ॥ अहावी न विद्यते हावो मुखविकारो यस्यासौ अहावी। दुःखिनो जनस्य मुखे हावो हास्यादिविक्रिया न भवेदित्यभिप्राय ॥ ४ ॥ हा हा इति खेदे ॥ ५ ॥ वी उश्च इश्च वी। उ ईश्वर। इ कामः। ईश्वरानङ्गयोर्वैर प्रसिद्धमेवास्ति। अनङ्गो हि रुद्रेण दग्ध ॥ ६ ॥ हावी मुखविक्रियाहास्यादियुक्त ॥ ७ ॥ अवीरा वीरैः सुभटैः रहिता। अवीरा सेना भनक्ति ॥ ८ ॥ 'रा रोदने' रा इत्यय धातुर्दानेऽस्ति ॥९॥ अवी मेषौ ऊर्णायू ॥ १० ॥ श्लोक ॥ ११ ॥ अवीहा अश्रुजले ईहा वाञ्छा यस्या सा अवीहा ॥ ११ ॥ रा द्रव्यम् ॥ १२ ॥ राहौ विधुंतुदे ग्रहे ॥ १३ ॥ ई लक्ष्मीः ॥ १४ ॥ वी विश्च विश्च वी पक्षिणौ। हसगरुडावित्यर्थ। ब्रह्मणो वाहन हस कृष्णस्य वाहनं गरुडइति प्रसिद्धम् ॥ १५ ॥ वीहा विषु पक्षिषु ईहा वाञ्छा यस्याः सा ॥ १६ ॥ वीरा विगता इरा जलं यस्या सा वीरा। जलरहिता न भवतीत्यर्थ ॥ १७ ॥ वीरा योद्धार ॥ १८ ॥ 'हा ओहाङ् गतौ' ॥ १९ ॥ एते सर्वेऽप्यर्था हारावीत्येतेष्वेव वर्णेषु भवन्त्यत एव सर्वतो भवतीति सर्वतोभद्र नाम यथार्थम् ॥

इति सर्वतोभद्रजातिः।

प्रतिलोमानुलोमाभ्यामुत्तरेण गतागतम्।
मध्यवर्णविलोपेन तच्चानेकप्रकारकम् ॥ २३ ॥

गत च प्रत्यागत च गतप्रत्यागते। ते विद्येते यस्मिन् तत् गतप्रत्यागतं प्रश्नोत्तरम् ॥

वद वल्लभ सर्वत्र साधुर्भवति कीदृशः।
गोविन्देनानसि क्षिप्ते नन्दवेश्मनि काभवत् ॥ २४ ॥

क्षीरनदी ॥ अनेकप्रकारक भवति। क्षीरनदी एतच्च पद प्रतिलोम वाच्यम्। प्रतिलोमो वामवाचना, अनुलोमो दक्षिणवाचना च। दीनरक्षी इत्येवं स्यात्। अस्यायमर्थः। दीनान् दुःस्थान् भिक्षाचरादीन् रक्षत इत्येवंशीलो दीनरक्षी। दीनपालक इत्यर्थः। क्षीरनदी क्षीरं दुग्धं तस्य नदी जाता। द्वितीयवार अनुलोम वाच्यम् ॥

यत्नादन्विष्य का ग्राह्या लेखकैर्मसिमल्लिका।
घनान्धकारनिःशङ्कं मोदते केन बन्धकी ॥ २५ ॥

नालिकेरजा ॥ नालिकेराज्जाता नालिकेरजा। नालिकेरफलं प्रसिद्धम्। तद्वृक्षसत्कपत्रान्तःशलाकायाः लेखनी समीचीना भवेत्। एतदेव प्रतिलोम वाच्यते। जारकेलिना। उपपतिस्तु जारः स्यात्। जारेण सह केलिः क्रीडा तया ॥

असुरसुरनरेन्द्रे रुह्यते का शिरोभि-
स्तनुरपि शुचिवस्त्रे कातिविस्तारमेति ।
वदति कमलयोनिः सेव्यते केन पुष्पं
मधुरमसृणमृद्वी का भवेदुत्पलस्य ।। २६ ।।

मालिका ॥ माला एव मालिका । पुष्पादिमाला देवाना शिरसि शाश्वती भवत्येव । तदेव प्रतिलोम वाच्यम् । कालिमा श्यामता । उज्ज्वले वस्त्रे मषीबिन्दुरूपापि बहुविस्तार प्राप्नुयादिति भावः । कालिना । हे क हे ब्रह्मन् । अलिना भ्रमरेण । तदेव प्रतिलोमं वाच्यम् नालिका । नाली एव नालिका नालं । इदं च प्रश्नचतुष्टयं मन्थानाकृत्या लिखित्वा वाचनीयम् । तथा कृते मध्यस्थो लिकारश्चतुरो वारान् वाच्यते ॥

हिमांशुखण्डं कुटिलोज्ज्वलप्रभं
भवेद्वराहप्रवरस्य कीदृशम् ।
विहाय वर्णं पदमध्यसंस्थितं
न किं करोत्येव जिनः करोति किम् ।। २७ ।।

दंष्ट्राभं ॥ दंष्ट्रा दाढा दंष्ट्रावत् आभा शोभा यस्य तत् । अथवा दंष्ट्रा इव भाति दीप्यते तत् । द्वितीयायामुदय प्राप्तश्चन्द्रो वक्रोज्ज्वलगुणेन सूकरदंष्ट्रया सहोपमीयते । दंष्ट्राभमित्यत्र मध्यस्थ ष्ट्रा इति वर्णस्त्यज्यते । पश्चाद्गतप्रत्यागतरीत्या वाच्यम् । तच्च दम्भमिति स्यात् । जिनो दम्भ कपट न करोति । विपरीतवाचनया भंदमिति स्यात् । जिनो भन्द कल्याणं करोति । 'भदि कल्याणे' । एवं मध्यस्थितवर्णलोपेन गतप्रत्यागत दर्शितम् ॥

वसन्तमासाद्य वनेषु कीदृशाः पिकेन राजन्ति रसालभूरुहाः ।
निरस्य वर्णद्वयमत्र मध्यमं तव द्विषां कान्त्यतमातिथिश्च का ।।२८।।

कांतगिरा ॥ कान्ता मनोहरा गीर्वाणी यस्यासौ कान्तगी तेन कान्तगिरा । अत्रोत्तरमध्यादनुस्वार । अयं हि मन्थानाकृतिचित्रबन्धः । मन्थान 'रवाइनुं फूल' इति भाषा तस्य कृतिराकार तद्वच्चित्रबन्ध । तकारगिकाररूपं वर्णद्वय त्यक्त्वा वाच्यम् । कारा बन्दिगृहम् । वामवाचनया राका । 'राका पूर्णे निशाकरे' । पूर्णे मासे जातत्वाद्राका पूर्णमासी । अनेकप्रकारकं दर्शितम् ॥

इति गतप्रत्यागतजातिः ।

आदौ मध्ये तथान्ते वा वर्धन्ते वर्णजातयः ।
एकद्वित्रादयो यत्र वर्धमानाक्षरं हि तत् ।। २९ ।।

वर्धमानानि अक्षराणि यस्मिन् तत् वर्धमानाक्षरं प्रश्नोत्तरम् ॥

किमनन्ततया ख्यातं पादेन व्यङ्गमाह्वय ।
जनानां लोचनानन्दं के तन्वन्ति घनात्यये ।। ३० ।।

खंजनाः ॥ ख आकाशम् । आकाशस्य सर्वत्र वर्तमानत्वादन्तो नास्ति। हे खंज हे खोड । खंजनाः मध्यदेशे पोदनो नाम पक्षिविशेष खंजन उच्यते । अत्र त्वेकैकाक्षरवृद्ध्या उत्तरत्रय कृतम् ॥

उरःस्थलं कोऽत्र विना पयोधरं बिभर्ति संबोधय मारुताशनम् ।
वदन्ति कं पत्तनसंभवं जनाः फलं च किं गोपवधूकुचोपमम् ॥३१॥

नागरंगं ॥ ना पुमान् । हे नाग हे सर्प । नागरं नगरे भवो नागरस्तम् । नागरगं नारंगीफलम् । अत्रैकैकाक्षरवृद्ध्या प्रश्नोत्तराणि द्रष्टव्यानि ॥

प्रायेण नीचलोकस्य कः करोतीह गर्वताम् ।
आदौ वर्णद्वयं दत्वा ब्रूहि के वनवासिनः ॥ ३२ ॥

शबराः ॥ रा द्रव्यम् । शबराः भिल्ला । इति पश्चादक्षरप्रदानेनोत्तरं दर्शितम् ॥

सानुजः काननं गत्वा नैकषेयाञ्जघान कः ।
मध्ये वर्णत्रयं दत्वा रावणः कीदृशो वद ॥ ३३ ॥

राक्षसोत्तमः ॥ रामः दशरथि । एतस्य एवोत्तरस्य रकारमकारयोर्मध्ये त्रीण्यक्षराणि क्षसोत्त इति लिखित्वा वाच्यम् । राक्षसोत्तम इति स्यात् । राक्षसाना मध्ये उत्तमः श्रेष्ठ । इत्येवं मध्ये वर्णप्रदानेन वर्धमानं दर्शितम् ॥

धत्ते वियोगिनीगण्डस्थलपाण्डुफलानि का ।
वद वर्णौ विधायान्ते सीता दृष्टा भवेत्कया ॥ ३४ ॥

लवलीलया ॥ लवली लताविशेष. । अस्यैवोत्तरस्यान्ते वर्णौ द्वौ लया इति कृत्वा वाच्यम् । लवलीलया लवो नाम पुत्रस्तस्य लीला क्रीडा तया । इत्येवमन्ते वर्णप्रदानेन वर्धमानं दर्शितम् ॥

विष्णोः का वल्लभा देवी लोकत्रितयपाविनी ।
वर्णावाद्यन्तयोर्दत्वा कः शब्दस्तुल्यवाचकः ॥ ३५ ॥

समानः ॥ मा लक्ष्मी. । एतस्यैवादौ सकारो अन्ते नकारश्च एतौ वर्णौ दत्वा वाच्यम् । समान तुल्य. । इत्येवमादावन्ते च वर्णप्रदानेन वर्धमानं दर्शितम् ॥

इति वर्धमानाक्षरजातिः ।

आदितो मध्यतोऽन्ताद्वा हीयन्ते वर्णजातयः ।
एकद्वित्र्यादयो यत्र हीयमानाक्षरं हि तत् ॥ ३६ ॥

हीयमानानि अक्षराणि यस्मिन् तत् हीयमानाक्षरं प्रश्नोत्तरम् ॥

वसन्तमासाद्य वनेषु राजते विकाशि किं वल्लभपुष्पमुच्यताम् ।
विहंगमं कं च परिस्फुटाक्षरं वदन्ति कं पङ्कजसंभवं विदुः ॥ ३७ ॥

किंशुकं ॥ किंशुक. पलाश. । खाखरो । किंशुके भव किंशुकम् । केसूडफूल । अत्र तदेव आदिमवर्णपरिहारेण वाच्यम् । शुकं कीरं । शुकपक्षी शुद्ध वदति । अत्रापि द्वितीयस्यापि वर्णस्य त्यागेन वाच्यम् । कं ब्रह्माणम् । विष्णोर्नाभिकमले ब्रह्मा जात । कशब्दो ब्रह्मवाचकः प्रसिद्धः ॥

समुद्यते कुत्र न याति पांसुला समुद्यते कुत्र भवं भवेज्जलात् ।
समुद्यते कुत्र तवापयात्यरिः प्रहीणसंबोधनवाचिकं पदम् ॥ ३८ ॥

हिमकरे ॥ हिमकरे चन्द्रे उद्गते सति उद्योतत्वादन्यत्र यातीति दृश्यते अतो न याति । तद्विधाना तासा त्वन्धकार एव समीचीन । उक्तोत्तरमध्यात् हि इति प्रथमाक्षरत्यागेन कृत्वोच्यते । मकरे मकरमत्स्ये उत्पन्ने सति। द्वितीयाक्षरत्यागेन वाच्यते । करे हस्ते । सायुधे ऊर्ध्वीकृते सति शत्रुर्भज्यते । तृतीयाक्षरत्यागेन वाच्यते। रे 'रे दास' इति चामन्त्रणे : एवमादित एकैकाक्षरहान्या हीयमानं दर्शितम् ॥

तपस्विनोऽत्यन्तमहासुखाशया वनेषु कस्मै स्पृहयन्ति सत्तमाः ।
इहापि वर्णद्वितयं निरस्य भोः सदा स्थितं कुत्र च सत्वमुच्यताम्॥३९॥

तपसे ॥ तपोगुणाय । तपस्विना हि तप एव प्रियं भवति । वर्णद्वयत्यागात्से इत्यवशिष्यते । सकारभाव- सकारे वर्तते । अत्राक्षरद्वयहान्या हीयमानाक्षरोदाहरणं दर्शितम् ॥

पुरुष: कीदृशो वेत्ति प्रायेण सकला: कला: ।
मध्यवर्णद्वय त्यक्त्वा ब्रूहि क: स्यात्सुरालय: ॥ ४० ॥

नागरिकः ॥ नागरिक नगरनिवासी चतुरो वा । एतस्यैव मध्यात् गरीति वर्णद्वय त्यज्यते तदा नाक इति स्यात् । नाक स्वर्ग । अत्र मध्यवर्णद्वयहानिर्दर्शिता ॥

यजमानेन क: स्वर्गहेतुः सम्यग्विधीयते ।
विहायाद्यन्तयोर्वर्णौ गोत्व कुत्र स्थितं वद ॥ ४१ ॥

यागविधिः ॥ यजन याग यज्ञो दान वा तस्य विधि । यस्य प्रोक्तकरण विधिः होमदानविधिरित्यर्थ । यागविधिरित्येतन्मध्यात्प्रथमान्तिमवर्ण त्यज्यते तदा गवि इति तिष्ठति। गविशब्दे गोत्व वर्तते । एवमाद्यन्तवर्णयोस्त्यागेन हीयमानाक्षर दर्शितम्॥

इति हीयमानाक्षरजातिः ।

अन्योन्याक्षरवर्तिन्या चैकान्तरतयाथवा ।
शृङ्खलाबन्ध इत्युक्तः

शृङ्खलाया इव शृङ्खलाकारेण बन्धो रचनाविशेष शृङ्खलाबन्ध । इति प्रश्नोत्तरम् ।

पवित्रमतितृप्तिकृत्किमिह किं भटामन्त्रणं
ब्रवीति धरणीधरश्च किमजीर्णसंबोधनम् ।
हरिर्वदति को जितो मदनवैरिणा सयुगे
करोति ननु क. शिखण्डिकुलताण्डवाडम्बरम् ॥ ४२ ॥

पयोधरसमयः ॥ पयो जलम् । पाश्चात्यवर्णत्यागात् अग्रेतनवर्णग्रहणेन वाच्यते । हे योध । अत्र पकारस्त्यक्त । अग्रेतनयकारो गृहीत. । पाश्चात्यरीत्या हे धर हे पर्वत, हे रस हे अजीर्ण । पर्वत प्रति अजीर्णसबोधनं उक्तम् । हे सम मा लक्ष्मीस्तया सह वर्तमान सम तत्सबोधन हे हरे । मय मयो नामा कश्चिद्दैत्यविशेषो हरेण हत इति भावार्थ । पयोधरसमय- पयोधरस्य समय काल: । मेघागमे हि मयूरा विशेषेण नृत्यन्ति ॥

भवति जयिनी काजौ सेनाह्वयाधरभूषणं
वहति किमहिः पुष्पं कीदृक्कुसुम्भसमुद्भवम् ।
महति समरे वैरी वीर त्वया वद किं कृतः
कमलमुकुले भृङ्गः कीदृक्पिबन्मधु राजते ॥ ४३ ॥

परागरंजिता ॥ परा उत्कृष्टा । हे राग । पूर्ववदत्रापि पाश्चात्यो वर्णस्त्यज्यतेऽग्रेतनो गृह्यते । राग आरक्तत्वम् । अधरस्य आरक्ततैव प्रशस्यते । गरं गरलं रजिरजतीत्येव शीलं तत् रंगयुक्त । 'रंज रागे' । सुगमम् । परागरजित परागेण केसरेण रंजितः प्रीणितमना । लोहमयी शृङ्खला कटकवत् अन्योन्य अक्षराणि संकल्पन्तेऽत शृङ्खलाजाति. ॥

इति शृङ्खलाजातिः ।

आह्वानं किं भवति हि तरोः कस्यचित्प्रश्नविज्ञा.
प्रायः कार्यं किमपि नकुलौ कुर्वते के परेषाम् ।
पूर्णं चन्द्रं वहति ननु का पृच्छति म्लानचक्षुः
केनोदन्याजनितमसमं कष्टमाप्नोति लोकः ॥ ४४ ॥

नीरापकारेण ॥ नीरापकारेणेत्यस्मिन्नेकाक्षरपरिहारेण । अत्र द्वितीयो रा इति वर्ण· परित्यज्यते । हे नीप हे वृक्षविशेष । प्राग्वदेकान्तरितवर्णग्रहणेन परे अन्ये आत्मन कार्याणि सर्वे कुर्वन्ति । परकार्यकृत्तु विरल । राका पूर्णिमा । अत्र पूर्वे ये वर्णा परित्यक्तास्त एव योज्यन्ते । हे काण एकाक्ष । सर्वैरेवाक्षरै नीरापकारेण नीरस्य जलस्य अपकारः अभावस्तेन । नीर विना तृषा कष्ट ददाति ॥

का संबुद्धिः सुभट भवतो ब्रूहि पृच्छामि सम्यक्
प्रातः कीदृग्भवति विपिनं संप्रवृद्धैर्विहंगैः ।
लोकः कस्मिन्प्रथयति मुदं का त्वदीया च जैत्री
प्रायो लोके स्थितमिह सुखं जन्तुना कीदृशेन ॥ ४५ ॥

वीहारसेविना ॥ हे वीर । अत्रापि प्राग्वदेकान्तरिता एव वर्णा गृह्यन्ते । रवि रव शब्दो विद्यते यस्मिन् तत् रवि शब्दयुक्तम् । त्यक्ताक्षरसयोजनया उत्तर कर्तव्यम् । हासे हास्ये । सेना सैन्य । वीहारसेविना वीहार उपवनादिषु खेलन देवायतन जिनालयं वा वीहारं सेवते इत्येवशीलो वीहारसेवी तेन । अथवा वीहारस्य सेवा विद्यते यस्यासौ तेन । वीहारसेवायुक्तेन मनुष्येण सुखमनुभूयत इत्यर्थः । एकान्तरितवर्णग्रहणेनात्र शृङ्खलाबन्धस्य द्वितीयो भेद ॥

इति एकान्तरितशृङ्खलाजातिः ।

ग्रन्थिमान्नागपाशकः ॥ ४६ ॥

ग्रन्थिमान्नागपाशकः यस्मिन्नागपाशबन्धे ग्रन्थिर्बध्यते सः ग्रन्थिमान् । नागाना सर्पाणा पाशबन्ध एव नागपाशक· प्रश्नोत्तरम् ॥

गोष्ठी विदग्धजनवत्यपि शोचनीया
कीदृग्भवेत्तरणिरश्मिषु का सदास्ति ।
दुर्वारदर्पदलितामरनायकापि
कीदृग्जयकारि सुरशत्रुचमूर्गृहेण ॥ ४७ ॥

तारकविरहिता ॥ प्रथमाक्षरद्वयत्यागेन वाच्यते । कविरहिता कविना पण्डितेन रहिता । अन्त्याक्षरद्वयत्यागेन पश्चादानुपूर्व्या वाच्यते । रविकरता रवे सूर्यस्य करता किरणभाव । अत्र प्राक् कविरहितेत्युत्तर कृत्वा पश्चात् रविकरता इत्युत्तरं कृतम्। एवं कविरवि एतयोर्मध्ये वि इति वर्णो नागपाशबद्ध. । तत् बद्धत्व च बन्धदर्शनाज्ज्ञेय प्रश्नार्थविद्भिरिति । तारकविरहिता तारकनामा दैत्यस्तेन विरहिता वियुक्ता कृता ॥

कीदृक्परैरुपहतो भवति क्षितीशः
पृच्छत्यनुष इह किं विदितं पवित्रम् ।
विच्छिन्नपाणिचरणो जनको यदीयः
कीदृक्परैरभिहितः स पुमान्पुनः स्यात् ॥ ४८ ॥

व्यंगतनयः ॥ अत्राप्येकाक्षरपरिहारेण वाच्यते । गतनय गतस्त्यक्तो नयो न्यायो येनासौ अन्यायी राजा । अन्त्याक्षरैकत्यागेन पश्चादानुपूर्व्या वाच्यते । हे नत हे अप्राशो वामन, गव्य गोरिद गव्य गोमूत्र गोमय क्षीर दधि सर्पि इति पञ्च । व्यङ्गतनय । विगतानि अङ्गानि हस्तादीनि यस्यासौ व्यङ्गस्तस्याय तनय पुत्र इत्युच्यतेपरैः । अत्रापि गतनत एतयोर्मध्यस्थयकारो ग्रन्थिगत्या बाध्यतेऽत एव नागपाश नागपाशजातिरिति ॥

इति नागपाशजातिः ।

भाषाभिश्चित्रितं यत्स्यात्संस्कृतप्राकृतादिभिः ।
सन्तश्चित्रं तदिच्छन्ति संशुद्धं त्वेकभाषया ॥ ४९ ॥

संस्कृतप्राकृतादिभिर्भाषाभिर्यच्चित्रित रचितं स्यात् तत्पृष्ट चित्रं नाम 'संस्कृत प्राकृतं चैव शौरसेनी च मागधी । पैशाची चाप्यपभ्रंश. षड भाषा विबुधैः स्मृता.' ॥

कि न स्यात्कीदृक्षं महतोऽपि च तादृशस्य जलराशेः ।
दिणमणिकिरणप्फंसणपडिबुब्भं होइ किं गोसे ॥ ५० ॥

कमलवणं ॥ कं पानीय अलवणं लवण क्षाररसस्तेन रहितं न भवति । समुद्रस्य जलं क्षारमेव भवेत् । समानामपि समुद्राणा मध्ये प्रथमो लवणसमुद्र. । 'लवणक्षीरदध्याज्यसुरेक्षुस्वादुवारय.' इति सप्त समुद्रा. । इति संस्कृतेन पृष्टं संस्कृतेनोत्तरं दत्तम् । अथ प्राकृतेन पृच्छति प्राकृतेनैवोत्तरं ददाति—**दिणमणीति** । अस्य संस्कृतं लिख्यते—'दिनमणिकिरणस्पर्शनप्रतिबुद्धं भवति किं प्रातः' इति । उत्तरम्—कमलवणं कमलानां वनम् । वणमिति प्राकृतभाषा ॥

मत्स्यहितमम्बु कीदृक्पृच्छति रोगी निशासु किं भाति ।
कोऽनङ्गो वदवि मृगः खे गम्मइ केरिसा रइणा ॥ ५१ ॥

अविसामभमिरेण ॥ अवि न विद्यन्ते वयः पक्षिणो यस्मिन् तत् पक्षिरहितम् । बकादिपक्षिणो मत्स्यान् घ्नन्ति । हे साम हे सरोग । आमो रोगस्तेन सह वर्तमानः तत्संबोधनम् । भं नक्षत्रं । हे एण हे मृग । ई कामः अनङ्गः । अग्रे प्राकृतरीत्या चोच्यते—खे गम्मइ केरिसा रइणा । अस्य संस्कृतम्—आकाशे गम्यते कीदृशेन सूर्येण इति । उत्तरम्—अविसामभमिरेण अविश्रामभ्रमिणा । अविश्रामा विश्रामरहिता भ्रमिर्भ्रमणं यस्य स तेन । भ्रमिशब्दस्य भमिर इत्यादेश प्राकृतभाषायाम् । विश्रामरहितभ्रमणशील. सूर्यो गगने भ्रमन्न कुत्रापि तिष्ठतीति तात्पर्यम् । इति सस्कृतयुक्तप्राकृतोदाहरणम् ॥

इति संस्कृतप्राकृतजातिः ।

प्रायो बिभ्यति कीदृशादरिगजाद्दन्तप्रहीणा गजा:
पृथ्वी संप्रति कीदृशी नृपतिना राजन्वती राजते ।
प्रायः प्रावृषि कीदृशी गिरितटी धत्ते च कः कज्जले
मज्झन्ने चलिए घणुअशदिणे जादं सरो केरिसं ॥ ५२ ॥

सरदादवताविदबाहिरं । सरदात् रदाभ्या दन्ताभ्या सहवर्तमानः सरदस्तस्मात् निर्दन्तेन गजेन सदन्तहस्तिना सह योद्धुमशक्यमिति भावः । अवता 'अव रक्ष पालने' अवतीत्यवन तेन अवता रक्षता । विदवा विगतो दवो वनवह्निर्यस्या सा । अहिः शेषनाग. । अ विष्णुं । अग्रे अपभ्रंशभाषया मज्झन्ने इत्यादि । अस्य संस्कृतम्–मध्यान्हे चलिते घनात्ययदिने जातं सरः कीदृशम् । उत्तरम्—सरदादवताविदबाहिरं । शरदातपतापितं बाह्यं । शरद आतपेन तापितं बाह्यं बहिर्भागो यस्य तत् ॥

कृत्तं कीदृशमङ्गं दन्तभवं कं वदन्ति विद्वांसः ।
अतिलघुवाचि पदं किं केरिसु सुयणेसु होइ जणो ॥ ५३ ॥

विस्रंतमणु ॥ विस्रं 'पूतिगन्धस्तु दुर्गन्धो विस्रं स्यादामगन्धि यत्' इत्यमरः । पूतिगन्धमदित्यर्थ. । तं तकारं 'लृतुलसाना दन्ता' इति वचनात्तकारो दन्त्य' । अणु स्तोकं वा । अणुः परमाणु' । अग्रे चतुर्थपदेऽपभ्रंशभाषा । केरिसु इति । अस्य सस्कृतम्–कीदृशः स्वजनेषु भवति जन । उत्तरम्—विस्रतमणु विश्रान्तं विश्वस्तं मनो यस्यासौ । इति सस्कृतयुक्तापभ्रंशोदाहरणम् ॥

इति संस्कृतापभ्रंशजातिः ।

किं सुखमाहुः प्रायः केशविकारं च का हरेर्दयिता ।
कथमाभा कस्मिन्निशि को लुब्बइ वीलपुलिशाणं ॥ ५४ ॥

शमलकंमालंभे ॥ शं सुखं अलकं 'अलकाश्चूर्णकुन्तला' इत्यमरः । मा लक्ष्मीः अलं अतिशयेन भे नक्षत्रे ।अतःपरं मागधीभाषा–को लुब्बइ वीलपुलिशाणमिति । अस्य संस्कृतम्—को रोचते वीरपुरुषेभ्यः । उत्तरम्–शमलकंमालंभे समरकर्मारम्भः ।

समरस्य संग्रामस्य कर्म कार्यं तस्य आरम्भः । वीरपुरुषाणामिष्टो भवति । 'वीरपुरिसाणम्' इति चतुर्थ्यर्थे षष्ठी । मागधीभाषायां सकारस्य शकारः । तथा रेफस्य लकार इति भावः ॥

कः स्तम्बेरमसुत इति विख्यातः पृच्छति स्फुटं हरिणः ।
अहिणवणयलीलञ्जो असाहुणो केन उज्जुडइ ॥ ५५ ॥

कलभएण ॥ हे एण हे मृग । कलभ. हस्तिपुत्र. । 'द्वात्रिंशद्वार्षिको हस्ती कलभः' इति । अत्रोत्तरार्धे मागधीभाषा—अहिणवेति । अस्य संस्कृतम्—अभिनवनगरीलोकोऽसाधोः केन त्यजति ॥ उत्तरम्—कलभएण करस्य दण्डस्य भयेन । राज्ञो दण्डभयेन । लोका उज्जडन्ति न पश्यन्तीत्यर्थ. । इति संस्कृतयुक्तमागधीभाषोदाहरणं दर्शितम् ॥

इति संस्कृतमागधिकम् ।

कोपारुणं किमरुणाग्रसरस्य पूर्व-
काष्ठाग्रनिष्ठिततनोरुपमानपात्रम् ।
पत्तं खणेण मरणं सअरस्स रण्णं
पुत्तेहि किं पविसिउण्ण तुरगमत्थं ॥ ५६ ॥

कपिलपनं ॥ कपिलपनं कपेर्मर्कटस्य लपनं मुखम् । कपिवदनमथारक्तं भवति । अग्रे पैशाची भाषा—पत्तमित्यादि । अस्य संस्कृतम्—प्राप्तं क्षणेन मरणं सगरस्य राज्ञ पुत्रै.प्रविशद्भिरिह किं च तुरङ्गमार्थम् । उत्तरम्—कपिलपनं कपिलनाम्न ऋषेर्वदनं तत्प्रति प्रवेशं कुर्वद्भिस्तैः तत्क्षणात् एव मरण प्राप्तमित्यर्थः । कपिलपमित्यत्र पैशाच्या वनशब्दस्य आदिवकारस्य पकारत्वेन श्रवणात् पनमिति स्यात् ॥

कं प्रीणयन्ति जलदाः सैन्यं कीदृक्पलायते समरात् ।
धत्ते शिरोधरा किं रुद्दशिरं केरिसं होइ ॥ ५७ ॥

चातकंकातरकं ॥ चातकं बप्पीह । कातर भीरु । क मस्तक । चतुर्थपादे पैशाची—रुद्देति । अस्य संस्कृतम्—रुद्रशिर कीदृश भवति । उत्तरम्—चातकंकातरकं जातगगातरग जाता उत्पन्ना गङ्गायास्तरंगाः लहर्यो यस्मिन् तत् । रुद्रस्य शिरस. सकाशात् एव गङ्गा नि सरति । अत्र पैशाच्या जकारस्थाने चकार गकारस्थाने ककारो दर्शित । इति संस्कृतयुक्तपैशाचीभाषोदाहरण दर्शितम् ॥

इति संस्कृतपैशाचिकम् ।

को वर्णाद्यः क जलधिसुता कं च दीर्घादिसंज्ञं
प्राहुर्बुद्धाः कमजयदसौ तार्किकैः के क्रियन्ते ।
आमन्त्र्यो विः कथय विदितं किं पदं हेतुवाचि
जा णद्धी ए इमइ महिला सावि बोलेइ कीसे ॥ ५८ ॥

अएचम्मारंवादावेहि ॥ अ. अकार. मात्रिकाया द्विपञ्चाशद्वर्णेषु स्वराणा मध्ये प्रथमोऽकारः स्वर एवास्ति । यथा अइउण् , ऋऌक् , इत्यादिषु पाठः । ए अः शब्दः कृष्णवाचकस्तस्मिन् ए कृष्णे । च चकार । मारं कंदर्पं । प्रायें जिनेनैव कंदर्पो जित. । जिनस्य सर्वथापि स्त्रीसगो नास्ति । अतएवेदमुक्तम् । वादाः अन्योन्यं

संस्कृतजल्पनादिशाङ्ककलहा. । हे वे हे पक्षिन् । यतोऽर्थो अतोऽग्रे लौकिकभाषा— जाणवीए इति । अस्यार्थ जाया महिला स्त्री हि णवी नर्तयितुं ए एत्थ इमइ आयाति सा वि अपि निश्चितं कीसे कीदृक् बोल्लेइ जल्पति । उत्तरम् अएचम्मारं-वादावेहि । अए इति आमन्त्रणे । चम्मार ढोलम् । वादावेहि वादय । अस्य संस्कृतम्—अये मृदंगं वादय । अहं नर्तयामि । त्वं वाद्यं वादयेति जल्पन्ती आगच्छेत् ॥

शब्दः कः स्यात्पुरुषवचनं कुण्डलौ कौ स्मरारेः
कामाम्भोधेर्हरिरुदहरद्वीवधः पृच्छतीदम् ।
हांडी कुण्डी अणिसि नरडा कीस अह्मार एत्थं
जो पुच्छिज्झा स पुण परिहारुत्तरं कीस देइ ॥ ५९ ॥

नाहीकुंभार ॥ ना पुमान् । अही सर्पौ । कुं पृथ्वी । हे भार । अग्रे लौकिक-भाषा—हाडी कुडी इत्यादि । नरडा इति नरसबोधनन् । अ ब्रह्मार । एत्थमस्मदर्थी । हाडीकुडी लोकभाषा । हंडिका भाण्डानि कुडिका. कुण्डानि । कीस कथम् । अणिसि नानयसि इत्येव जो पुच्छिज्झा य पृच्छेत् । तस्य स पुण स श्रोता तं पुन. परि-हारुत्तर प्रत्युत्तर कीस देइ कीदृक् ददाति । अस्या एकीभूत सस्कृतम् । हे नर, अस्म-दर्थ हडिका कुंडिका. कथंचन आनयसि एव य पृच्छेत् तस्य स. श्रोता तं प्रति पुनः प्रत्युत्तर कीदृक् ददाति । उत्तरम्—नाहीकुभार नास्ति कुभार कुंभकार विना भाण्डानि कुत आनयामीत्युत्तर दीयते । इति संस्कृतयुक्तलौकिकभाषोदाहरणं दर्शितम् ॥

इति संस्कृतलौकिकं । इति चित्रजातिः ।

एकभाषाया सशुद्ध प्रश्नोत्तरम्—

को निवसइ सच्छंदं सुंदर गिरिगहणकुंजमज्झम्मि ।
सह अज्जुणेण जोज्झुं शिहिगमणो केरिसो होइ ॥ ६० ॥

सरभससवराहवग्गो ॥ अथ शुद्धप्राकृतम्—को निवसइ इति । व्याख्या—हे सुन्दर सुभग, गिरेर्गहने पर्वतस्य कठिने कुञ्जमध्ये स्वच्छन्दं स्वेच्छया को निवसति । उत्तरम्—समग्रेण । सरभससवराहवग्गो सरभा अष्टापदा. शशा· प्रसिद्धा·, वराहा सूकरा , तेषा वर्ग समूह । कुञ्जे निलीनस्तिष्ठति । 'निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे' इत्यमर । तथा सह अज्जुणेणेति । शिखी मयूरो गमन यस्य स शिखिगमन कार्तिकेयोऽर्जुनेन सह योद्धु युद्ध कर्तु कीदृशो भवति । उत्तरम्—तैरेवाक्षरै । सरभसा वेगवन्त ईदृशा. ये शबरा. भिल्लास्तै सार्ध आहवे सग्रामे गच्छतीति आहवग. आहवाग्योऽग्रगामी वा ॥

का हरइ मणं पइणो गुणगणजुव्वणलाहणिज्जुस्स ।
कयचडचडत्ति सद्दा हूयासा केरिसां हुंति ॥ ६१ ॥

सरिसवहुया ॥ का हरइ इति । गुणाना गणेन समूहेन यौवनेन च श्लाघ्यस्य च पुनरार्यस्य श्रेष्ठकुले जातस्य । आर्यपुत्रस्येत्यर्थ. । ईदृशस्य पइणो पत्युर्मनः का

हरति । उत्तरम्—सरिसबहुया सदृशी समानवयोगुणा वधुका स्नुषा भर्तुर्मनो हरतीति भावार्थ । तथा कयचड इति । कृत चटचटदिति शब्दो यैस्ते हुता अग्नयः कीदृशा भवन्ति ! उत्तरम्—तैरेवाक्षरैर्भिन्नार्थेन । सरिसबहुया सर्षपैर्हुताः । सिद्धार्थैर्हुतो हुताशनश्चटचटायते चटचटशब्दं कुरुते ॥

इति शुद्धप्राकृतम् ।

पाणिग्गहणणियंसणु सोहइ कहि मंडिउं ।
साहसवदुवि वीर पइरिपुबलं कहि खंडिउं ॥ ६२ ॥

समरंगणेहिं ॥ अथ शुद्धापभ्रंशी भाषा दर्श्यते--पाणिग्गहणेति । पाणिग्रहणस्य विवाहस्य निवसन वस्त्र केर्मण्डितं शोभितम् । उत्तरम्—समानरङ्गकरणे तुल्यरङ्गप्रदानेन । तथा हे वीर साहसवदुवि साहसेन युक्तमपि प्रतिरिपुबलं सैन्यं कें कृत्वा खंडितं छेदितम् । त्वयेति शेष । उत्तर तदेव । समरंगणेहि सग्रामाङ्गणे मया वैरिबल भग्नमिति भावार्थ ॥

रसिअह केण उच्चाडण किज्जइ
 जुयइह माणसु केण उविज्जइ ।
तिसिय लोउ खणि केण सुहिज्जइ
 एह पहो मह भुवणे विज्जइ ॥ ६३ ॥

नीरसराएण ॥ रसिअह केण इति । रसिकाना शृङ्गारादिनवरसविज्ञानाम् । अथवा श्रीरागादिषट्त्रिंशद्रागरसविज्ञानाम् । केनोच्चाटनमुद्विग्नचित्तता क्रियते । उत्तरम्—नीरसराएण नीरसश्चासौ रागश्च नीरसरागस्तेन । दु स्वरेण रसिका उद्विजन्ति उद्वेगं प्राप्नुवन्तीत्यर्थ । तथा युवत्या नवयौवनाया स्त्रिया मानसं चित्तं केनोद्विज्यते उत्तरम्—नीरसरागेण नीरसेन शृङ्गारादिरसरहितेन यो राग सबन्धस्तेन । अथवा निर्गतो रसो बल पुरुषार्थत्व वा नीरसो वृद्ध तस्य रागेण । युवत्यै तु वृद्धो न रोचते । तथा तृषितो लोकः क्षण क्षणमात्र स्तोककालं केन सुखी क्रियते । उत्तरम्—नीरशरावेण नीरस्य जलस्य शराव पात्रं कोशिका तेन । कोशिकाप्रमाणमपि जलं तृषितस्य क्षणं सुखयति । तथा एहपहेति । एतदयं मम प्रश्न भुवने केन गीयते । जगत्रितयमध्ये गीयत इत्यर्थ. । उत्तरम्—नीरसरागेण नितरा रसो नीरस , विशेषेण रसयुक्तो राग सौकण्ठ्यं यत्रासौ नीरसरागस्तेन । अतिसुकण्ठरागेण मम गृहे गीयत इत्यर्थः । एवमस्यार्थचतुष्टयं ज्ञायते ॥

इति शुद्धापभ्रंशं ।

सुयलो मेहं पुच्छइ मेहो वि अतं तहा सुयलं ।
केण हया सयलसुया केण जणो विसइ पायालं ॥ ६४ ॥

बलाहकविलेण ॥ अथ शुद्धमागधीभाषामाह—सुयलो मेहमित्यादि । शूकरो मेघं पृच्छति । तथा मेघोऽपि तं शूकरं पृच्छति । उभयो प्रश्नमाह—सगरसुताः सगरचक्रवर्तिनः पुत्राः केन हता इति शूकरेण मेघ. पृष्टः । मेघः कथयति । उत्तरम्

बलाह कविलेण हे वराह हे शूकर कपिलेन ऋषिणा । तथा मेघः शूकरं पृच्छति—केण जणो विसइ पायालं जनो लोक पातालमधोलोकं केन विशति । शूकर. कथयति । उत्तरम्—हे बलाहक हे मेघ बिलेन भूमिद्वारेण । भूमिद्वारेण पाताललोके प्रविश्यते ॥

धवलुज्जलेहिं केहिं सोहइ धरणी मसाणदेसस्स ।
नरयस्स रक्वाइं नाकहिं समप्यतिनिहितं कताइपि ॥ ६५ ॥

नलकलंकेहिं ॥ धवलुज्जलेहिमिति । स्मशानदेशस्य धरणी पृथ्वी धवलोज्ज्वलैः कै. शोभते । उत्तरम्—नलकलकेहिं नराणा मनुष्याणा करंकैरस्थिपञ्जरैः । अत्र रकारस्थाने लकार । तथा नरकस्य रक्षपाला· कै परिवेष्टिता भवन्ति । तैरेवाक्षरै· नरकस्य रंकैर्वराकै ॥

इति शुद्धमागधिकं ।

पेरी पुच्छदि ककने रावति कसनो खनो कहिख ।
कच्चाइं ना कहिं समप्यति निहितं कताइं पि ॥ ६६ ॥

अहितपक्खेहिं ॥ अथ शुद्धपैशाची भाषोच्यते—पेरी पुच्छदि इत्यादि । वैरी पृच्छति कृष्ण श्यामो घनो मेघो गगने आकाशे कैः कृत्वा राजति इति पृष्टे उत्तरम्—अहितपक्खेहिं हे अहित हे शत्रो पक्खेहि पक्षीहिति संस्कृतम् । पक्षिभिरिति । बलाकाप्रभृतिपक्षिभि· शोभते। तथा कच्चाइं इति निहित निश्चितं कृतान्यपि कृत्यानि कार्याणि कैर्न समाप्यन्ते । अयं भावार्थ —सजातमपि कार्यं कैर्भङ्गमापद्यते न समाप्यते। समाप्तभाव नापद्यते । अत्रोत्तरम्—तदेव । अहितपक्षिभि शत्रुपक्षीयैरेवार्थाः भज्यन्ते ॥

पत्तून कि फटचनो निचतेहताना
अत्थासनं फचति चंफनिसूतनस्स ।
फोत्तून खोरतरतुक्खसताइ पावा
मोहान्धकारगहनं लय किं लफन्ति ॥ ६७ ॥

विसमरणं ॥ पत्तून किमित्यादि वसन्ततिलकाछन्द· । अस्य भाषाश्लोकस्य संस्कृतश्लोको लिख्यते—प्राप्याथ कि भटजनो निजदेहदानादर्धासनं भजति जम्भनिषूदनस्य । भुक्त्वा च घोरतरदु खशतानि पापा· मोहान्धकारगहनं वद किं लभन्ते ॥ भाषा—श्लोकस्य व्याख्या—फटचनो भटजनः निचतेहताना निजस्यात्मनो देहस्य दानात् किं पत्तून किं प्राप्य चंफनिसूतनस्स जम्भनिषूदनस्य इंद्रस्य अत्थासनं अर्धासनं फचति भजति इत्येवं शब्दार्थ·। उत्तरम्—विसमरणम् । विषमं च तत् रणं संग्रामश्च विषमरणं तत् विषमरणम् रणशब्दो नपुंसकलिङ्गेऽप्युक्तः कठिनसंग्रामं प्राप्य योद्धा इन्द्रस्यार्धासनं सेवते । संग्रामे देहदानात् स्वर्गप्राप्तिरिति पौराणिका वदन्ति । तथा पावा पापाः । खोरतरतुक्खसताइ घोरतरदुःखशतानि फोत्तून भुक्त्वा मोहान्धकारगहनं मोहो अज्ञानमेवान्धकारस्तेन गहनं निविडं किंफलंति किं फलंति प्राप्नुवंति । हेवि·

द्रुन् त्वं लप वद । अयमर्थः—पापिनो घोरं दुःख भुक्त्वा त्वन्ते किं फलं लभन्ते । उत्तरम् । विसमरणं विषेण मरणं नाशं विषमरणम् । पापिनोऽन्ते विषं भुक्त्वा म्रिय- न्तेऽयमभिप्राय ॥

इति शुद्धपैशाचिकम् ।

जा नीयाणइ निंदे भिंभला सा किस वुच्चइ बोल्ल रे संभलि ।
जों तिलसरिसव पीडइ जाण किसि भणिज्जइ सोवि न्नाणी ॥६८॥

सुतेल्ली ॥ अथ शुद्धलौकिकभाषामाह—जा नीयाणइ इत्यादि । या स्त्री निद्रया भिंभला व्याकुला किंचित् नीयाणइ न जानाति सभलि हे सखि । इति श्रुत्वा प्रश्नोत्तरत्वं बोल्ल रे वद । सा किसि वुच्चइ सा कीदृशी उच्यते । उत्तरम् । सुतेल्ली सा गुप्तोत्थिता उच्यते । तया जो तिलसरिसव यो ज्ञात्वा तिलाश्च सर्षपाश्च पीडयति घाणियंत्रेण तैलादि निष्कासयति सोवि न्नाणी सोऽपि ज्ञानी शिल्पिक कीदृक् भण्यते उच्यते । अत्राप्युत्तरम्-सुतेल्ली । 'घूसरश्चाक्रियस्तेली' इति वचनात् । लोके 'घाची- तेली' इति नाम प्रसिद्धम् ॥

इति शुद्धलौकिकम् ॥

इति संशुद्धजातिः ॥

एतावतापि दिङ्मात्रं प्रश्नानां दर्शितं मया ।
येन येन हि माद्यन्ति तद्विदस्तत्तदूह्यताम् ॥ ६९ ॥

इति तृतीयः परिच्छेदः ।

चतुर्थः परिच्छेदः ।

व्यक्तीकृत्य कमप्यर्थं स्वरूपार्थस्य गोपनात् ।
यत्र बाह्यान्तरावर्थौ कथ्यन्ते ताः प्रहेलिकाः ॥ १ ॥

प्रहेलिकानाम पृष्टम् ।

सा द्विधार्थी च शाब्दी च विख्याता प्रश्नशासने ।
आर्थी स्यादर्थविज्ञानाच्छाब्दी शब्दविभागतः ॥ २ ॥

तरुण्यालिङ्गितः कण्ठे नितम्बस्थलमाश्रितः ।
गुरूणां सन्निधानेऽपि कः कूजति मुहुर्मुहुः ॥ ३ ॥

पानीयकुम्भः ॥ सा द्विधा आर्थी शाब्दी च । द्विप्रकाराया उदाहरणम् । श्लोकोक्तविशेषणैरुपेत स क स्यात् हे विद्वन्, त्वं ब्रूहि किमुत्तर दातव्यं विचार्यनामिति । एवं विशेषणाना भावे विचार्यमाणे ईदृशो युक्त्या भर्ता ज्ञायते । भर्तापि तरुण्या सोत्कण्ठमालिङ्ग्यते । तथा कान्ताप्रियो भर्ता उभयथापि नितम्बस्थाने गुह्यप्रदेशे तिष्ठेत् । तथा च गुरूणा मातृपितृश्वश्रूश्वशुरजनानामग्रेऽपि स्त्रियं कामयते । इत्येवमभिप्रायेण बाह्योऽर्थं । आभ्यन्तरस्तु पानीयकुम्भ । सोऽपि कूपसरोवरादौ जलेन भृत्वा शिरस्यारोपणसमये तरुण्या हस्ताभ्यामालिङ्ग्यते । प्राणादपि कान्त प्रियकक्षानितम्बस्थाने च गृह्यते । गुरूणा वृद्धघटानामुपर्युपविश्य कूजति बडबडायते । अतो घट एवायं निश्चयीकृत इत्येवमान्तरार्थ केनापि न ज्ञायते । एवमर्थस्य द्वैविध्यं दर्शितम् ॥

आपाण्डु पीनकठिनं वर्तुलं सुमनोहरम् ।
करैराकृष्यतेऽत्यर्थं किं वृद्धैरपि सस्पृहम् ॥ ४ ॥

पक्वबिल्वफलम् ॥ यत् श्लोकेनोक्त तत् किं । हे श्रोतः, त्वं ब्रूहि । उत्तरम्—प्रकटभावेन स्त्रिया कुचयुगलमिति ज्ञायते । आन्तरार्थस्तु पक्वबिल्वफलमिति । इति बाह्यान्तरार्थयोर्भेदेन आर्थी प्रहेलिका ॥

इत्यार्थी जातिः ।

दुर्वारवीर्य सरुषि त्वयि का प्रसुप्ता
श्यामा सपत्नहृदये सुपयोधरा च ।
तुष्टे पुनः प्रणतशत्रुसरोजसूर्ये
सैवाद्यवर्णरहिता वद नाम का स्यात् ॥ ५ ॥

शस्त्री ॥ शस्त्री लोहस्य छुरिका श्यामवर्णा लोहमयत्वात् । सुष्ठु पयो जल धरति सा । लोहेषु पानीयं दीयते । पुन. सा एव शस्त्री आद्यवर्णेन शकारेण रहिता सती स्त्री इति तिष्ठति । कीदृशी स्त्री । श्यामा षोडशवार्षिकी । सुपयोधरा सुष्ठु पयोधरौ स्तनौ यस्याः सा । ईदृशी स्त्री त्वयि तुष्टे सति शत्रूणा हृदयोपरि खेलते शेते वा । इत्येवंशब्दस्य विभङ्गादक्षरस्य लोपात् । द्वावर्थौ कृतौ । अत एव शाब्दी प्रहेलिका ॥

सदारिमध्यापि न वैरियुक्ता नितान्तरक्तापि सितैव नित्यम् ।
यथोक्तवादिन्यपि नैव दूतिका का नाम कान्तेति निवेदयाशु ॥६॥

सारिका । पुनरप्रकारेण शब्दभाजना दर्शयति—सदारिमध्येति । व्याख्या—हे कान्त हे प्रिय भर्त , त्वं आशु शीघ्रं इति पूर्वोक्त निवेदय कथय । सा का नाम स्यात् । या सदा सर्वदा अरीणा मध्ये स्थितापि वैरिभिर्युक्ता न शत्रुभिर्युक्ता न विद्यते । 'न वैरयुक्ता' इति पाठे वैरेण विरोधेन युक्ता नास्ति । एवं विरोधाभासः । उत्तरम्—सारिका । अत्रैवं विरोधपरिहारेऽर्थो विधेय. । शारिका इति शब्दमध्ये अरिशब्द. । वा रिकारो वर्तते । पर कैश्चित्सार्व वैर नास्ति । पुनश्च या नितान्तं अतिशयेन रक्ता रक्तवर्णापि नित्यं सिता श्वेतैव सा सिता कथमुच्यते । अत्रापि विरोधः । अत्रापि विरोधपरिहारेऽयमर्थो विधेय । रकारककारयुक्तापि सितैव सकारेण इता युक्ता सिता । सारिका इत्यत्र सकाररकारककारवर्णा सन्ति । कान्ता इति श्लोके कृते कान्तो यस्या सा कान्ता । सारिका इति शब्दे अन्ते का इति वर्णो विद्यते । कान्ता कामनीया मनोहरा वा इत्येव विशेषणत्रयोपेते सति सारिका इति शब्दः । 'रमवानी सोगटी' इति भाषा घटते । कथम् । अरीणा रमणवता मध्ये स्थितापि कैश्चित्सार्व वैर नास्ति । पर सा उपरिभागे रक्ता अधोभागे श्वेता परं कान्ता सुन्दरा इति । तथा यथोक्तवादिन्यपि दूती नैव भवति यथा उच्यते तथा वदति । परं दूती सा न । अत्रापि विरोध । दूतीधर्मस्त्वीदृश एव सारिका तु पापठ्यमाना यथोक्त पठति पर दूती न भवति । एषा सारिका कथ्यते । पोपटी काबरी इति भाषा । इयमपि शाब्दी प्रहेलिका ॥

इति शाब्दी जातिः ।

नीरस्य उण बहुगुणवंतउ भमइ निरतर निश्चल हुंतु ।
तरुगिगिज्जिणउ पलुपत्तुतसु जो परिजाणइ पाविसोजगिजसु ॥७॥

गुणवृक्ः ॥ अथ लौकिकभाषया शाब्दीं प्रहेलिका दर्शयति—नीरस इति । व्याख्या—नीरम क पुनर्बहुगुणवान् वर्तते । यो नीरम सः गुणवान् कथमिति विरोध । उत्तरम्—गुणवृक । 'गुणवृक्षस्तु कूपक ' गुर्णदवरकैर्वद्धो वृक्षो गुणवृक्षः । प्रसिद्धभाषया 'वाहाणनो कुवाथभ' स च नीरे जले शेतेऽसौ नीरशय. । वा निर्गतः रसो यस्मात् स नीरसक । अतिशुष्कत्वात् । बहुभिर्गुणैर्दवरकैर्बाध्यते । अतो बहुगुणवान् । तथा भमइ तिरतर नित्यं भ्रमति पर निश्चल. सन् तिष्ठति । यश्चलन् सः निश्चल. कथ भवेदिति विरोध. । अत्रापि वाहनेन भ्रममाणेन सार्धं भ्रमति । आत्मना त्वेकत्रैव तिष्ठति । तथा तरुर्वृक्ष इति गीयते कथ्यते । परं फलपत्रे न स्त· गुणवृक्ष इत्युच्यते फल च पत्र च न भवति जो परिजाणइ यो नरोऽस्यार्थस्य परीक्षा स्वभाव जानाति स पुमान् बहुयश प्राप्नोति । इत्यक्षरार्थ. ॥

घरि घरि चलिइ सयलपियारी जीवंती वेरयरी साहो नारी ।
खणि बम्भइ खणि मुच्चि खणि एकल्ली तह जाणसु जइ जाइ नी पिल्ली ८

पाशासारी ॥ घरिघरि इति । व्याख्या—गृहे गृहे व्रजति प्रतिगृहं याति परं सकलजनप्रिया सा नारी जीवति यदा तदा वैरकरी विरोधकारिणी भवेदिति शेषः क्षणेन बध्यते क्षणेन मुच्यते तथा जानीथ यूयं यया क्षणेन एकाकिनी प्रेरिता सती नो याति । उत्तरम्—पाशासारि पाशकसारिका बन्धनदवरकेण युक्ता पोपटी काबरिया भाषा । अथवा रमावाना पाशासहित सोंगठी इति भाषा । सा च पाशसारी गृहे गृहे काष्ठादौ व्रजति । यत्रैव याति तत्रैव प्रिया । सा च यावज्जीवति तावत् क्रीडाकर्तुर्वैरकरी दुःखदायका म्रियमाणा सुखाय स्यात् । क्षणेन बध्यते चलितुं न शक्नोति क्षणेन मुच्यते चलति एतद्रीत्यार्थद्वय जातम् । इति शाब्दी लौकिकभाषा ॥

इति प्रहेलिकाजातिः ।

कालसारादिकं हृद्यमजमारादि गूढकम् ।
विदग्धो दुर्विदग्धानां कुरुते दर्पशान्तये ॥ ९ ॥

कालश्च सारश्च कालसारौ तौ आदी यस्य तत्कालसारादिकं हृदि भवं हृद्य नाम पृष्टम् ॥

अनुनेतुं मानिन्या दयितश्चरणे सरागचरणायाः ।
यावत्पतितः स तया तत्क्षणमत्रतारितः कस्मात् ॥ १० ॥

कालहृद्यं ॥ कालो रजस्वलत्वादिदिन अवगम्यते । अस्यार्थं भाव.—कालस्य च सारस्य च ज्ञानं हृदये स्थाप्यते पश्चात्पृच्छ्यते । अतएव हृद्यमिति पण्डितैरपि दुःखेनावबुध्यते ईदृशया श्लोकोक्तयानया स्त्रिया यो दयितो दूरीकृत । स. कस्मात्केन हेतुना । हे विद्वन्, त्व ब्रूहि इति पृष्टम् । अत्र हेतुर्वक्तुर्हृदयस्थोऽप्यनुक्तेन ज्ञायते धीमद्भिरपि अतएव हृद्यम् । अत्र हेतुमाह—रजस्वलत्वात् स्त्रीधर्मत्वात् । अहमस्पृश्यास्मीति मा मा स्पृशेति विज्ञायावज्ञातो निजदयितहृद्यो भाव. श्लोकमध्येन भवति रजस्वलाकालो हृद्य इति ॥

अवलोक्य स्तनौ बध्वा गुञ्जाफलविभूषणौ ।
निःश्वस्य रोदितुं लग्ना कुतो व्याधकुटुम्बिनी ॥ ११ ॥

सारहृद्यं ॥ एतच्च रोदनं तया कुत कृतमिति प्रष्टव्यम् । हृद्योऽय भाव. । गजादिवधे समर्थोऽयं मुक्ताफलाना हार परिधापयेदिति पुत्रस्य गजादिवधेऽसमर्थत्वं विज्ञाय तया कुटुम्बिन्या वधूकुचावालोक्य नि.श्वस्य च रुदितम् । क्षीणबलत्वेन निजपुत्रस्यासमर्थत्व विचारितम् । स्तनयोरारक्तत्वेन बध्वा· नवयौवनत्वं चिन्तितमित्याकूतम् । पुत्रस्य असारतो रोदनहेतु । स तु हृद्यः प्रष्टुर्हृदयस्थ कथन विना न ज्ञायते । इति सारहृद्यम् ॥

इति कालसारजातिः ।

दरदिट्ठचूयमउलं पिच्छिय सहि याहि विरहिणी सहियम् ।
नमिउं किंकेल्लितरू चूउं चरणाहदो कत्तो ॥ १२ ॥

रागद्वेषहृद्यं ॥ लौकिकभाषया अन्यदपि हृद्यमेव दर्शयति—हरदिट्ठेति । व्याख्या

चूतस्याम्रस्य मुकुलं पुष्पोद्गमं ईषत् दृष्ट्वा काचित्सखी विरहिणी सती सख्याः सन्मुखं पश्यति । सखीं प्रति दर्शयित्वा कंकेलितरुरशोकवृक्षः शिरसा प्रणतः । चूतश्चरणे-नाहतः । तत्कुत. इति वो विचारणीय. भावोऽयं गूढः । अत्र भाव· श्लोकमध्ये लिखितो नास्ति । किंतु हृदि वर्तते । स चायम् । आम्रे मुकुलदर्शनाद्विरहिण्याः विरहो दीपित· । ततो दु खं कृत्वा आम्रस्तया चरणेन हत । तथा कंकेलितरुप्रफु-ल्लितत्वात्स्वसदृश· प्रणतोऽयं हेतुर्ज्ञायते । अस्याः भाषार्याया अर्थान्तरं लिख्यते । ईषन् दृष्ट्वा चूतमुकुलं विरहिणी सखीं प्रेक्ष्य सखीभिरशोकवृक्षो नमित । चूतः पादा-हत· । तत्कस्माद्धेतो । अशोके पुष्पिते सति सख्या प्रिय. समेष्यति । अतः कार-णात्प्रणत· । चूतदर्शने सति अस्या स्मरकष्टं जातमिति कारणात् हत· । इति राग-द्वेषहृद्यम् ॥

पिच्छन्तमणिमिसच्छं पिच्छिय वहूया झत्तित्ति भिक्खयरं ।
दंसिय कयाइं सीसे कत्तो दो जाइकुसुमाइं ॥ १३ ॥

अन्यच्च हृद्यं कथयति लौकिकभाषया—पिच्छन्तमित्यादि । व्याख्या—कयाचिद्वधू-कया अनिमिषाक्षं निमेषरहितनेत्र ईदृश प्रेक्षन्त विलोकयन्त कंचन भिक्षाचर भिक्षुकं पिच्छिय दृष्ट्वा झटिति शीघ्र तया द्वे सख्ये जातीकुसुमे जपापुष्पे त भिक्षुकं दर्शयि-त्वा स्वशीर्षे कृते मस्तके धृत्वा तस्मै दर्शिते । कत्तो तत्कुत कस्माद्धेतोरित्युच्यतामिति पृष्टव्यम् । अत्रा‌‌प्येवं हृद्यम् । भिक्षाचरेण सा मया सस्नेह विलोकिता तया तु जाती-कुसुमयोरुच्चस्थाने धरणेन निजजातिरेनत्कुसुमवदुज्ज्वला । उभयपक्षविशुद्धास्म्यह त्वद्योग्या नास्मीत्युत्तर दत्तम् । अकार्यं नैव कर्तव्यम् । अय भावोऽस्ति ॥

इति कालसारादिहृद्यजातिः ।

रविसुतकृतगोकर्णः श्रुतिविषयगुणाम्बरो वनात्मधरः ।
नरकशिरा जगदखिलं चिरमव्यादसमरुक्पाणिः ॥ १४ ॥

अजगूढकम् ॥ अजमारादिगूढकम् । अजश्च मारश्चाजमारौ तौ आदी येषां तेऽज-मारादय पदपादार्थाः ते एव गूढा गुप्ता यस्मिन् तत् अजमारादिगूढकम् । अस्यायं भाव —अज शंभु । तद्वाचीशब्दो गूढो यस्मिन् तत् अजगूढम् । मार. कामः स एव गूढो यस्मिन् तत् मारगूढम् । विभक्त्यन्त पद तदेव गूढं यस्मिन् तत्पदगूढम् । श्लोकस्य चतुर्थो भाग पाद स एव गूढो यस्मिन् तत्पादगूढम् । अर्थ शब्दार्थ स एव गूढो यस्मिन् तत् अर्थगूढम् । इति पञ्च पृष्टाना उदाहरणानि वक्ष्यति । असमरुक्पाणिः । न समोऽसमो विषमः स चासौ रुक्चासमरुक् शूलरोग । त्रिशूलमित्यायुधविशेषः । सः पाणौ हस्ते यस्य स शूलपाणिर्महादेव । एवमेतन्नामगुप्त ज्ञापितम् । त्रिपादो-क्तैर्गूढार्थविशेषणैरजो महादेवो वर्णित । इति अजगूढम् ॥

इयमेका जातिः ॥

कुध्रेनसुग्रीनयनाश्रयाशदग्धोन्मदा दर्दुरहर्षकाले ।
स्वजन्मभक्ष्यप्रियभोजनाशा नृत्यन्ति भीमानुजगोजभाजः॥१५॥

अत्र विशेष्यपदं गूढम् स्वजन्मभक्षप्रियभोजनाशाः इति, विशेष्यपदं स्वस्माज्जन्म येषां तानि स्वजन्मानि स्वापत्यानि तानि भक्षयन्ति ते जन्मभक्षाः सर्पास्ते एव-प्रियाः भोजनस्य आशा येषा ते ईदृशा. मयूरा इति मयूरनामगोपितम् । दर्दुर-हर्षकाले दर्दुराणां मण्डूकाना हर्षकालो वर्षाकालस्तस्मिन् इति वर्षानाम गोपितम् । किंभूताः मयूरा. । कुं पृथ्वीं धरन्ति ते कुध्रा. पर्वतास्तेषामिन स्वामी हिमाचलस्तस्य सूः पुत्री पार्वती ता प्रीणातीति प्रीर्महादेवस्तस्य नयनस्थ आश्रयाशो नेत्रवह्निस्तेन दग्धो य. कामस्तेन उन्मदा उन्मत्ता. । अत्र मारस्य नाम गोपितम् । इति मारगूढम् ॥

मारगूढं । इयमप्येका जातिः ।

वाताच्छीतिररिप्रोऽरं वो हरतान्महासुरीदयितः ।
वीडव्राज्यानौका वार्वाहाभोसमस्ताना: ॥ १६ ॥

अथ क्षेपकः श्लोकोयं ।

व्ययवासाः पञ्चशिराः यरिर्वीनारिभूषणः ।
असिरोमा क्रियादुर्वः शङ्कालायनवीक्षणः ॥ १७ ॥

अत्र गूढार्थयोजना वर्तते । महासुरीदयित इत्यस्मात् ईदयित इति विशेष्यपदगुप्त धृतमस्ति । अत्र क्रियादुर्वे इत्यस्माद्वाक्यात् उरिति विशेष्यं गूढम् ॥ इति पदगूढम् ॥

पदगूढं । इयमेका जातिः ।

दयावान्प्रयतः शुद्धः प्रबुद्धः कमलेक्षणः ।
पापापहस्त्रिभुवन बुद्धः पायादपायतः ॥ १८ ॥

अत्र बुद्ध पायात् इति चतुर्थ पाद· पूर्वेषु त्रिषु पादेषु गुप्तोऽस्ति । कोऽर्थ – चतुर्थपादस्य वर्णा· प्रथमद्वितीयतृतीयपादेष्वन्तर्गोपिता· सन्ति । सम्यग्विचार्य विलोकितव्याः ॥

न मज्जति क्वचिद्दोषे प्रीणाति जगतो मनः ।
य एकः स परं श्रीमान् चिरं जयति सज्जनः ॥ १९ ॥

अत्रापि चतुर्थ पादो गूढ चिर जयति सज्जन इति । पाश्चात्यत्रिषु पादेषु गोपितोऽस्तीति विचार्य सद्भिर्द्रष्टव्य ॥ इति पादगूढम् ॥

पादगूढं । इयमप्येका जातिः ।

दृष्टो मया सखि ब्रूहि रोदयित्वा गतोऽद्य माम् ।
भद्रे कल्याणिनी भूयाः प्राचीं पश्य विनिर्मलाम् ॥ २० ॥

अत्र भाव. क । यथेयं प्राची निजभर्तु सूर्यस्य विरहेण रात्रौ दु खितापि अधुना सूर्योदये विकसिता सशोभा जाता । तथा त्वमपि भर्तुरागमे विलासं प्राप्स्यसीति भावः सख्या ज्ञापितः ॥

दाहिणपवणुव्विग्गा सम्मीलइ लोअणाइं पहियवहू ।
निउणसही उण तीए कण्णविवरेहिँ ढक्केहि ॥ २१ ॥

दाहिण इति । व्याख्या—काचित्पथिकवधूर्दक्षिणपवनेनोद्विग्ना व्याकुलीकृता सती लोचने संमीलयति आच्छादयति । तदा च तस्या निपुणसखी प्रवीणवयस्या तस्याः पथिकनार्याः कर्णयोर्विवरे छिद्रे अङ्गुल्या ढक्कयति । मुद्रयतीत्यर्थः । तत्सख्या कर्णाच्छादनं कस्मात्कृतं इत्यर्थो गूढविचारणीयः । तच्चैवं तया दक्षिणपवनमसहमानया निजनेत्रे मुद्रिते । सख्या च विरहिणीत्वान्मा कदाचित्कर्णमार्गेणास्याः जीवो व्रजेदित्यतस्तस्याः कर्णौ पिहिताविति भावः । अथ पाठान्तरम् । पथिकवधूर्लोचनानि संमीलयति । किंभूता । दक्षिणपवनोद्विग्ना निपुणसखी पुनस्तस्याः कण्ठमपि हस्तैश्छादयति । तत्कथम् । सा कण्ठगतप्राणा अहमेवं मन्ये । अन्यथास्याः कण्ठात्प्राणाः गमिष्यन्ति ॥

अर्थगूढं । इति गूढजातिः ।

स्तुतिनिन्दातदर्थत्वाद्व्यर्थमर्थद्वयोदयात् ।
निह्नवात्कथितस्यापि शब्दव्याजादपह्नुतिः ॥ २२ ॥

स्तुतिश्च निन्दा च स्तुतिनिन्दे । ते विद्येते यस्यां सा स्तुतिनिन्दाजातिः । द्वौ अर्थौ यस्मिन् तत् द्व्यर्थं पृष्टम् । कथितस्यार्थस्य शब्दकपटेन मिथ्याभाषणात् अपह्नुतिरिति नामजातिः । एषा त्रयाणामुदाहरणानि मूलग्रन्थे सरलानि भवन्ति ॥

बहुदोषो गुणध्वंसी गोहन्ता जनपीडकः ।
करोतु विरथो लोकमस्तमाप्रमहोदयम् ॥ २३ ॥

विष्णोः स्तुतिनिन्दे ।

सततमहितजनवत्सलबहुभयपापक्रियापरिभ्रष्टः ।
इह कलिकाले कुपतिर्जगतस्त्वं परमदुःखकरः ॥ २४ ॥

राज्ञ स्तुतिनिन्दे ।

इति स्तुतिनिन्दाजातिः ।

प्रसन्नवदनः श्रीमानयं लब्धमहोदयः ।
करप्रचारसुभगो राजा नन्दयति प्रजाः ॥ २५ ॥

चन्द्रभूपती ।

विनायकाहितप्रीतिर्देवो गङ्गां बभार यः ।
सर्वदोमाधवः स त्वामव्याद्व्यर्थविक्रमः ॥ २६ ॥

हरिहरौ ।

इति द्व्यर्थजातिः ।

सीत्कारं शिक्षयति व्रणयत्यधरं तनोति रोमाञ्चम् ।
किमु नागरिको मिलितो नहि नहि सखि हैमनः पवनः ॥२७॥

रुचिरस्वरवर्णपदा रसभाववती जगन्मनो हरति ।
तत्किं तरुणी नहि नहि वाणी बाणस्य मधुरशीलस्य ॥ २८ ॥

इति अपह्नुतिजातिः ।

स्वरेषु बिन्दुयुक्तेषु हलानां यदबोधनम् ।
तद्बिन्दुमदिति प्राहुः केचिद्बिन्दुमतीमिति ॥ २९ ॥

बिन्दु. अनुस्वारो विद्यते यस्मिन् तत् बिन्दुमत्पृष्टम् ॥

मानसीनाभसीत्याद्या बुद्ध्यादौ न्यासतो हि याः ।
बाहुल्येनाप्रयोगास्ता नेह तासां प्रदर्शनम् ॥ ३० ॥

ठिठठठठ्ठाठट्टुं ठिठ्ठुं ठिंठोः ठुठुठ्ठुठीठठिठः ।
ठठठुठठठि ठुठठाठुठठठुठीठठठोठठठ्टुंठः ॥
त्रिनयनचूडारत्नं मित्रं सिन्धोः कुमुद्वतीदयितः ।
अयमुदयति घुसृणारुणतरुणीवदनोपमश्चन्द्रः ॥ ३१ ॥

किमुक्तं भवति । बिन्दुमज्जाते प्रथम श्लोक विधाय पश्चाद्ये श्लोकस्य वर्णाः भवन्ति ते लुप्यन्ते तेषा स्थाने ठकारा बिन्दवो वा क्रियन्ते । तत्रस्था. स्वरास्तत्रैव स्थाप्यन्ते । एवमेषा बिन्दुमती भवति । पर हलानामभावान्न केनापि स श्लोको वाचयितुं शक्यते । अत्र त्रिनयनचूडारत्नमित्यस्य आर्यावृत्तस्य वर्णस्थाने ठकारा लिखिता. सन्ति । उपरिष्टाच्च स्वरा दत्ता. सन्ति । एतस्यैव श्लोकस्य रीत्या बिन्दुमती लेखनीया ॥

सखि विधुमध्यगतं किं तव वदनमुत गण्डशेखरस्याङ्कः ।
एतौ विलोकनात्परस्परं विस्मयं कुरुते दृश्यते च ॥ ३२ ॥

०ि ०ि०ु०ु०००ं ०ि ०० ००००ु० ०ं०े०००ु०ां०ः ।
०े०ौ ०ि०ो००ा०ु००ु०ं ०ि०ु०ं ०ु०ु०े ००ु०े ० ॥

इति बिन्दुमज्जातिः ।

सखि विधुमध्यगतं किमित्यार्या वृत्तस्य बिन्दून् लिखित्वा स्वरा देया ॥

क्रियादिकं स्थितं यत्र पदसंधानकौशलात् ।
स्फुटं न लभ्यते तच्च क्रियागुप्तादिकं यथा ॥ ३३ ॥

क्रिया इति क्रियापदं गुप्तं यस्मिन् तत् क्रियागुप्तं आदिर्यस्मिन् तत् क्रियागुप्तादिकम् । आदिशब्देन 'क्रियाकारकसंबन्धगुप्तान्यामन्त्रितस्य च । गुप्त तथा समासस्य लिङ्गस्य वचनस्य च ॥' सुप्तिङ्रूपस्य द्वयस्य वचनस्य च कारकशब्दे 'कर्ता कर्म च करण संप्रदानं तथैव च । अपादानाधिकरणमित्याहुः कारकाणि षट्' ॥

राजन्नवघनश्यामनिस्त्रिंशाकर्षदुर्जयः ।
आकल्पं वसुधामेतां विद्विषोद्य रणे बहून् ॥ ३४ ॥

पुंस्कोकिलकुलस्यैते नितान्तमधुरारवैः ।
सहकारद्रुमा रम्या वसन्ते कामपि श्रियम् ॥ ३५ ॥

एतानि अष्ट पृष्ठाना उदाहरणानि वक्ष्यन्तेऽनुक्रमेण राजन्नवघनश्याम इत्यत्र अव, विद्विषोद्य रणे इत्यत्र द्य, नितान्तमधुरारवैरित्यत्र अधु. ॥

इति क्रियागुप्तजातिः ।

न करोति नाम रोष न वदति परुषं न हन्त्ययं शत्रून् ।
रञ्जयति महीमखिलां तथापि धीरस्य वीरस्य ॥ ३६ ॥
शरदिन्दुकुन्दधवलं नगपतिनिलयं मनोहरं देवम् ।
यैः सुकृतं कृतमनिश तेषामेव प्रसादयति ॥ ३७ ॥

अत्र धीरस्येति पदे धीः, मनोहरमित्यत्र मनः, इति कर्तृपदं गुप्तम् ॥

इति कर्तृगुप्तम् ।

सीत्करासारसंवाही सरोजवनमारुतः ।
प्रक्षोभयति पान्थस्त्रीनिःश्वासैरिव मांसलः ॥ ३८ ॥
सुभग तवाननपङ्कजदर्शनसंजातनिर्भरप्रीतेः ।
शमयति कुर्वन्दिवसः पुण्यवतः कस्य रमणीयः ॥ ३९ ॥

सरोजवनमारुत इत्यत्र सरः । शमयतीत्यत्र शमिति कर्मपद भिन्नत्वेन ॥

इति कर्मगुप्तम् ।

पूतिपङ्कमयेऽत्यर्थं कासारे दुःखिता अमी ।
दुर्वारा मानस हंसा गमिष्यन्ति घनागमे ॥ ४० ॥
अहं महानसायातः कल्पितो नरकस्तव ।
मया मांसादिकं भुक्तं भीमं जानीहि मां बक ॥ ४१ ॥

दुष्ट वा जल दुर्वाः तेन दुर्वारा कलुषितजलेन । महच्च तत् अन शकटं च महानः तेन महानसा ॥

इति करणगुप्तम् ।

अम्भोरुहमये स्नात्वा वापीपयसि कामिनी ।
ददाति भक्तिसपन्ना पुष्पसौभाग्यकाम्यया ॥ ४२ ॥
प्रशस्त्यायुक्तमार्गस्य तव संमानिता श्रिताः ।
स्पृहयन्ति न के नाम गुणरत्नालयप्रभो ॥ ४३ ॥

अम्भोरुहमये इत्यत्र अये । इः कामस्तस्मै अये चतुर्थी । प्रशस्त्यायुक्तमार्गस्येत्यत्र प्रशस्त्यै कल्याणाय उक्तमार्गस्य ॥

इति संप्रदानगुप्तम् ।

शिलीमुखैस्त्वया वीरदुर्वारैर्निर्जितो रिपुः ।
बिभेत्यत्यन्तमलिनो वनेऽपि कुसुमाकुले ॥ ४४ ॥

सरसीतोऽयमुद्धृत्य जनः कंदर्पकारकम् ।
पिबत्यम्भोजसुरभि स्वच्छमेकान्तशीतलम् ॥ ४५ ॥

अलिनो भ्रमरात् । सरसीत सरोवरात् ॥

इत्यपादानगुप्तम् ।

या कटाक्षच्छटापातैः पवित्रयति मानवम् ।
एकान्ते रोपितप्रीतिरस्ति सा कमलालया ॥ ४६ ॥

विपद्यमानता सिद्धा सर्वस्यैव निरूष्मणः ।
यथात्र भस्मपङ्क्यां च निर्वाणं हन्त्ययं जनः ॥ ४७ ॥

ए कृष्णे कान्ते भर्तरि । एवं सप्तमी गुप्ता । विपद्यमानतेत्यत्र विपदि कष्टे ॥

इत्यधिकरणगुप्तम् ।

इति कारकगुप्तजातिः ।

तूणेव मधुमासेऽस्मिन्सहकारद्रुमञ्जरी ।
इयमुन्निद्रमुकुलैर्भाति न्यस्तशिलीमुखा ॥ ४८ ॥

प्राप्तमदो मधुमासः प्रबला रुक्मिप्रयतमोऽपि दूरस्थः ।
असतीसंनिहितेयं संहृतशीलासखी नियतम् ॥ ४९ ॥

उन्निद्रमुकुला एः इति भिन्ने पदे क्रियेते । इ. कामस्तस्य एः षष्ठ्येकवचनम् । अत्र मासः चन्द्रस्य ॥

संबन्धगुप्तम् ।

एका जातिः ।

सर्वज्ञेन त्वया किंचिन्नास्त्यविज्ञातमीदृशम् ।
मिथ्यावचस्तथा च त्वमसत्यं वेत्सि न क्वचित् ॥ ५० ॥

कमले कमले नित्यं मधूनि पिबतस्तव ।
भविष्यति न संदेहः कष्टं दोषाकरोदये ॥ ५१ ॥

सर्वं जानातीति सर्वज्ञस्तस्य इन स्वामी तत्सबोधनं हे सर्वज्ञेन हे पण्डितश्रेष्ठ, कमले कं अले इति पदच्छेदः । हे अले हे भ्रमर ॥

इत्यामन्त्रितगुप्तम् ।

इयमथैका जातिः ।

विषादी भैक्ष्यमश्नाति सदा रोगं न मुञ्चति ।
रुष्टेनापि त्वया वीर शंभुनारिः समः कृतः ॥ ५२ ॥

नित्यमाराधिता देवैः कंसस्य द्विषतस्तनुः ।
मण्डलाग्रं गदाशङ्खं चक्रं जयति बिभ्रती ॥ ५३ ॥

विषं कालकूटं अस्ति सः विषादी । दारैः सह वर्तमानः सदारः । उभयत्र द्विती-

याहितत्पुरुषः समासः । नित्यमाराधिता देवैरित्यत्र नित्यमाः नित्यं मा लक्ष्मीर्यस्यां सा । बहुव्रीहिः ॥

इति समासगुप्तम् ।
इयमेका जातिः ।

नितान्तस्वच्छहृदयं सखि प्रेयान्समागतः ।
त्वां चिराद्दर्शनप्रीत्या यः समालिङ्ग्य रंस्यते ॥ ५४ ॥
कलिकालमियं यावदगस्त्यस्य मुनेरपि ।
मानसं खण्डयत्यत्र शशिखण्डानुकारिणी ॥ ५५ ॥

नितान्तस्वच्छहृदयमित्यत्र नितान्तहृदयं नितान्तमतिशयेन स्वच्छं निर्मलं हृत् हृदयं यस्य स नितान्तस्वच्छहृत् इति पुलिङ्गनिर्देशः । कलिकालमियमित्यत्र इयं अगस्त्यस्य वृक्षस्य कलिका अल अत्यन्तं मुनेः मनः खण्डयति । कलिका इति स्त्रीलिङ्गनिर्देशः ॥

इति लिङ्गगुप्तम् ।
इयमथैका जातिः ।

प्रमोदं जनयत्येव सदारा गृहमेधिनः ।
यदि धर्मश्च कामश्च भवेतां संगताविमौ ॥ ५६ ॥

सदारा इत्यत्र राः इति प्रथमैकवचनं सुबन्तम् । गृहमेधिन इति षष्ठी ॥

सुब्वचनगुप्तम् ।
इयमेका जातिः ।

कस्मात्त्वं दुर्बलासीति सख्यस्त्वां परिपृच्छति ।
त्वयि संनिहिते तासु दद्यात्कथय सोत्तरम् ॥ ५७ ॥

अतिशयेन पृच्छन्तीति परिपृच्छति । इति यङ्लुगन्ते अन्तिपरतो रूपमिति । इदमेव रूपमेकवचनं ज्ञायते न तु बहुवचनेन अत तिङ्वचनगुप्तम् ॥

इति तिङ्वचनगुप्तम् ।
इयमथैका जातिः ।

अन्योऽप्यर्थः स्फुटो यत्र मात्रादिच्युतकेष्वपि ।
प्रतीयते विदुस्तज्ज्ञास्तन्मात्राच्युतकादिकम् ॥ ५८ ॥

महाशयमतिस्वच्छं नीरं संतापशान्तये ।
खलवासादतिश्रान्ताः समाश्रयत हे जनाः ॥ ५९ ॥

यत्र प्रश्ने मात्राबिन्दुविसर्गाणा च्युतकेषु कृतेषु सत्सु द्वितीयोऽर्थः प्रकटो ज्ञायते तत् मात्रादिच्युतकादिकम् । च्युतकशब्देन कुत्रचित्स्थाने नाशः कुत्रचित् विनिमयः । 'सालटो पालटो' इति भाषा । मात्राच्युतकं आदिर्यस्मिन् तत् मात्राच्युतकादिकम् । आदिशब्देन 'मात्राबिन्दुविसर्गाणा च्युतकान्यक्षरस्य च । स्थानव्यञ्जनयोश्चापि' इति ।

एकस्मिन्नर्थे नीरं जलम् द्वितीयेऽर्थे नीरशब्दस्य ईकारस्थाने अकार· क्रियते । तदा नरं इत्यवशिष्यते ॥

तुषारधवलः स्फूर्जन्महामणिधरोऽनघ. ।
नागराजो जयत्येकः पृथिवीधरणक्षमः ॥ ६० ॥

नागराज शेषनाग एकस्मिन्नर्थे । द्वितीयेऽर्थे नागराज इत्यस्य आकारस्थाने अकारः क्रियते । तदा नगराज इति स्यात् । हिमाचलः ॥

इति मात्राच्युतकम् ।
इयमेका जातिः ।

सुश्यामा चन्दनवती कान्तातिलकभूषिता ।
कस्येषानङ्गभू: प्रीतिं भुजंगस्य करोति न ॥ ६१ ॥

एकस्मिन्नर्थे अनङ्गभू कामस्य स्थानं ईदृशी स्त्री । द्वितीयेऽर्थे अठेवारो लुप्यते तदा नगभू पर्वतस्य मलयाचलस्य भूमि ॥

यथा सत्प्रसवः स्निग्धः सन्मार्गविहितस्थितिः ।
तथा सर्वाश्रयः सत्यमयमेव कुलद्रुमः ॥ ६२ ॥

एकस्मिन्नर्थे अयं मे मम । वकुलद्रुम अशोकवृक्ष । बवयोरैक्यम् । द्वितीयेऽर्थे अयमेव कुलद्रुम इत्यत्रायमित्यस्मादनुस्वारस्त्याज्य तदायमेव कुलद्रुम इति स्थितम् । अयं पुमान् कुले द्रुम इव द्रुमो वृक्ष· ॥

इति बिन्दुच्युतकम् । इयमथैका जाति ।

महीरुहो विहंगानामेते हृद्यैः कलापिनाम् ।
विरुतैः स्वागतानीव नीरवाहाय कुर्वते ॥ ६३ ॥

एकस्मिन्नर्थे हृद्यै तृतीयाविभक्ति । मनोहरैर्विरुतै· शब्दै· । द्वितीयवार हृद्यैरित्यत्र विसर्गलोपेकृते हृद्यैकलापिना इति जातम् । हृद्यं सुन्दरं एकं अद्वितीयं लपन्ति वदन्तिते हृद्यैकलापिनस्तेषा विहंगानाम् ॥

अगस्त्यस्य मुनेः शापाद्ब्रह्मस्पन्दनमास्थितः ।
महासुः खात्परिभ्रष्टो नहुषः सर्पतां गतः ॥ ६४ ॥

एकवारं महासुः महान्तोऽसवः प्राणा यस्य सः । खात् आकाशात् । द्वितीयवारं सुरित्यत्र विसर्गलोपे कृते महासुखात् महच्च तत्सुखं च तस्मात् राज्यात् ॥

इति विसर्गच्युतकम् । इयमेका जातिः ।

महानपि सुधीरोऽपि बहुरत्नयुतोऽपि सन् ।
विरसः कुपरीवारो नदीनः केन सेव्यते ॥ ६५ ॥

नदीना इनः स्वामी नदीनः समुद्र इत्येकस्मिन्नर्थे । द्वितीयेऽर्थे नदीन इत्यस्मात् नकार. सस्वरो लुप्यते तदा दीन इति तिष्ठति । दीनशब्देन कृपणधनी पुमान् ॥

सुशीलः स्वर्णगौराङ्गः पूर्णचन्द्रनिभाननः ।
सुगतः कस्य न प्रीतिं तनोति हृदि संस्थितः ॥ ६६ ॥

एकस्मिन्नर्थे सुगतो बुद्धः जिनः। द्वितीयेऽर्थे सुगत इत्यस्मात् गकारः सस्वरो लुप्यते। तदा सुत इति स्यात्। सुत पुत्रः॥

इति अक्षरच्युतकम्।

इयमथैका जातिः।

तनोतु ते यस्य फणी गरुत्मान् पाणौ मुरारिर्दयिता च शय्या।
नाभौ स्फुरन्भद्रमशुभ्रदेहः पद्मागतिश्चक्रमसौ विधाता॥ ६७॥
हरः क्षयी तापकरः सुरेशः शान्तो हरिर्गोत्ररिपुर्विवस्वान्।
चन्द्रो द्विजिह्वाश्रित इत्युपेक्ष्य लक्ष्म्या वृतः पातु विधिर्जगन्ति६८

कर्तृकर्मक्रियापदानि स्थानान्तरे धृतत्वात् अन्वयो दुर्लभो यस्य वृत्तस्य तद्वृत्तं स्थानच्युतकं कथ्यते। एव सर्वत्रापि द्रष्टव्यम्। एव येषा श्लोकाना मध्ये अर्थयोजनिकाया कृतायां सत्या योजनिका स्थानान्तरे धृतास्ति यो यस्य शब्दस्यान्वयत्वेन लगति स शब्दस्तत्पार्श्वे धृतो नास्ति। अत एव स्थानच्युतकम्॥

इति स्थानच्युतकम्।

इयमेका जातिः।

भिक्षवो रुचिराः सर्वे रसाः सर्वजनप्रियाः।
क्षमायामभिसंपन्ना दृश्यन्ते मगधे परम्॥ ६९॥

एकस्मिन्नर्थे भिक्षव श्वेताम्बरा.। द्वितीयेऽर्थे भिक्षव इति पदाद्भकारलोप क्रियते तदा इक्षव इति गुडवृक्षा॥

सत्यशीलदयोपेतो दातासुचिरमत्सरः।
जिनः सर्वात्मना सेव्यः पदमुच्चैरभीप्सता॥ ७०॥

एकस्मिन्नर्थे जिनो वीतराग। द्वितीयेऽर्थे जिन एतस्माज्जकारो लुप्यते तदा इन इति स्थितम्॥

इति व्यञ्जनच्युतकम्।

इयमेका जातिः।

स्फोटयित्वाक्षरं किंचित्पुनरन्यस्य दानतः।
यत्रापरो भवेदर्थश्च्युतदत्ताक्षरं हि तत्॥ ७१॥

च्युते नाशे सति तस्मिन्नेव स्थाने दत्त अक्षरमन्यत् यस्मिस्तत् च्युतदत्ताक्षरं वृत्तम्॥

सदागतिहतोच्छ्रायस्तमसो वश्यता गतः।
अस्तमेष्यति दीपोऽयं विधुरेकः शिवे स्थितः॥ ७२॥
पूर्णचन्द्रमुखी रम्या कामिनी निर्मलाम्बरा।
तनोति कस्य न स्वान्तमेकान्तमदनातुरम्॥ ७३॥

एकस्मिन्नर्थे दीप। द्वितीयेऽर्थे दीप इत्यत्र पकारं लुप्त्वा तत्स्थाने नकारो दीयते तदा दीन इति। अयं दीनो विधुश्चन्द्र एक एव शिवे स्थित.। एकस्मिन्नर्थे कामिनी स्त्री। द्वितीयेऽर्थे यामिनी रात्रि.।

इति च्युतदत्ताक्षरजातिः ।

अम्बरमम्भसि पत्रमरातिः पीतमहीनगणस्य ददाह ।
यस्य वधूस्तनयं गृहमब्जा पातु स वो हरलोचनवह्निः ॥७४॥

इति स्थानच्युतकम् ।

कृतिस्तु धर्मदासस्य सौगतस्य तपस्विनः ।
विदग्धानां मुखाम्भोजप्रविकासकरी परा ॥ ७५ ॥

इति चतुर्थः परिच्छेदः ।

इति श्रीधर्मदाससूरिविरचितं विदग्धमुखमण्डनं काव्यं सटीकं समाप्तम् ।